RĀṢṬRAPĀLAPARIPṚCCHĀ

INDO-IRANIAN REPRINTS

edited by the Editorial Board of the

INDO-IRANIAN JOURNAL

II

RĀṢṬRAPĀLAPARIPṚCCHĀ

SŪTRA DU MAHĀYĀNA

Publié par

L. FINOT

Reproduction photoméchanique

1957

MOUTON & CO · 'S-GRAVENHAGE

Originally published by the Imperial Academy of Sciences, St.-Petersburg, 1901,
as Volume II of the
BIBLIOTHECA BUDDHICA

Printed in The Netherlands by Mouton & Co., Printers, The Hague,
and by Excelsior Photo-Offset, The Hague

A

M. EMILE SENART,

MEMBRE DE L'INSTITUT.

INTRODUCTION.

La Rāṣṭrapālaparipṛcchā, qu'on trouve citée sous le titre de Rāṣṭrapālasūtra[1]), est un sûtra mahâyâniste de date inconnue, mais qui ne peut être postérieur à la fin du VIe siècle, la traduction chinoise de Jñānagupta ayant été composée entre 589 et 618. Il est formé de deux parties (*parivartas*): la première, qualifiée d'introduction (*nidāna*), est consacrée à l'exposé des dharmas du Bodhisattva, c'est-à-dire des conditions qui rapprochent ou qui éloignent le futur Buddha de la suprême Illumination; la seconde contient le jātaka du prince Puṇyaraçmi.

---

1) Par exemple dans le Çikshāsamuccaya. M. C. Bendall a eu la complaisance de nous communiquer les variantes du texte de Çāntideva que nous donnons plus loin. Le Tipiṭaka contient un Raṭṭhapālasuttanta, qui n'a de commun que le titre avec notre texte (J. R. A. S. octobre 1894, p. 769—806). Ce sutta fait partie du Majjhima-nikāya (№ 82); il se retrouve dans le Madhyamāgama, version chinoise, № 132; il a été traduit isolément en chinois une seconde fois par Fa-hien (= Fa-tien), 982—1001. Le Raṭṭhapāla-apadāna, le Rāṣṭrapāla-avadāna de l'Avadānaçataka et le texte correspondant du Vinaya tibétain (Kandjour Dulva II) appartiennent au même groupe que le R.-suttanta, cf. L. Feer. Avadānaçataka. A. M. G. XVIII. 355—363. Un fragment encore inédit de Ms. sanscrit (en caractères gupta du Kashgar) provenant de Kuca mentionne, comme nous l'indique M. d'Oldenburg, un Rāṣṭrapāla.

Première partie. Le Buddha est à Rājagṛha, sur le Gṛdhrakūṭa, assis sur son trône, au milieu de son entourage habituel de bhikṣus, bodhisattvas, devas, asuras, nāgas etc. Le bodhisattva Prāmodyarāja se lève du sein de l'assemblée et célèbre l'éclat de Bhagavat (1—4). Aussitôt après, l'āyuṣmat Rāṣṭrapāla arrive de Çrāvastī, où il avait passé les trois mois du varṣa. Il chante à son tour les louanges du Maître, et finit en l'interrogeant sur les dharmas du bodhisattva (4—9). Le Buddha répond par l'exposé de ces dharmas, groupés quatre par quatre en douze catégories (10—21). Chaque catégorie fait l'objet d'un chapitre spécial composé d'un sommaire en prose et d'une amplification en vers (*gāthās*). Il semble que les sommaires soient postérieurs aux gāthās: celles-ci se développent très naturellement; ceux-là sont pleins de répétitions et de tours forcés qui trahissent la gêne d'un compilateur maladroit[1].

En guise d'illustration à cet exposé dogmatique, le Buddha cite cinquante de ses existences antérieures où il a déployé quelques unes des vertus du bodhisattva (21—27).

Voici ces jātakas, dont nous avons pu identifier plus de la moitié — le reste se laissera aussi identifier facilement aussitôt que seront publiés les recueils sanscrits, tibétains et chinois des légendes bouddhiques[2].

1) Ainsi la fréquentation du monde (*kulasaṃstava*) est citée une première fois (13. 1) comme un des dharmas dont le bodhisattva ne doit pas se soucier (*anapekṣeṇa bhavitavyam*), une seconde fois (20. 14) comme une de ses entraves (*bandhana*); l'envie (*īrṣyāmātsarya*) est d'abord (18. 4) un des dharmas qui l'écartent du chemin de la bodhi, ensuite (19. 17) un de ceux qui produisent la maturation de la douleur (*duḥkhavipāka*). L'auteur a des artifices ingénus pour réduire au nombre de quatre les dénombrements trop copieux: par exemple 14. 13 sqq.: «l'obtention de la sugati, *et cela par* le fait d'être contemporain de l'apparition d'un Buddha; la docilité envers le guru, *et cela par* l'abstention de viande . . .» Plus loin, cet officieux instrumental est remplacé par un génitif (15. 10 sqq.): «l'habitation dans la forêt *du bodhisattva* exempt de fourberie . . . l'indifférence pour la remunération *du bodhisattva* qui renonce à toute propriété.»

2) Cf. une liste analogue, Lalitavistara ch. XIII et Mahāvastu I. 91—95; Fa-Hien (Legge) pp. 105—106.

1. Kṣāntivādin	Jātaka 313. Mahāvastu III. 357 sqq. Jāt. mālā 28. Dsanglun XI. Bodhisattvāvadānakalpalatā 38. Ajaṇṭā Chamber outside Cave II. Boro-Boedoer pl. CLXI. Hiouen Thsang I. 133[1].
2. Çyāmaka	J. 540. Mhv. II. 210 sqq. Cariyā Piṭaka III. 13. B. A. K. L. 101. Bas relief du Gandhāra[2] Hiouen Thsang I. 121—122.
3. Subhāṣitagaveṣin	B. A. K. L. 53.
4. Vyāghrī	Hardy (Manual 92). J. m. 1[3]. Divyāvadāna 32. Dsanglun II. Fa-Hien ch. XI. Hiouen-Thsang. Vie p. 89[3]. B. A. K. L. 51 et 95. Suvarṇaprabhāsa ch. XIX.
5.	Beal R. L. 227—229. Dsanglun XXX (p. 247).
6. Sutasoma	J. 537. Cariyā p. 32. J. m. 31. Bhadrakalpāvadāna XXXIV.
7. Sarvaṃdada	Karmaçataka X. 2. B. A. K. L. 55. Hiouen-Thsang I. 136.
8. Çibi	Dsanglun I.
9. Kesarirājan	?
10. Sudaṃṣṭra[4]	Vessantara. J. 547. J. m 9. Cariyā p. 9. B. A. K. L. 23. Hiouen-Thsang I. 122—123. Sung-Yun (Beal I. XCIII, XCVII—XCVIII et CIII). Bharhut Cunningham p. VI.[5] Sañci[4], Boro-Boedoer pl. CXLII.[5]
11.	?
12. Vimalatejas	?
13. Candraprabha	Divyāv. 32. Mdo XXX. 2. Dsangl. XXII. Hiouen-Thsang I. 154. Sung-Yun. l. c. CII.
14. Puṇyasama	?
15. Çubha	?
16. Ratnacūḍa	Maṇicūḍa[6]. B. A. K. L. 3.
17. Dhṛtimant	?
18. Siṃhala cf. 45.	J. 195. Mhv. S. Beal R. L. 332—340. Divyāv. 523—528. Kāraṇḍavyūha. éd. pp. 52—59. Burnouf. Introd. 223—224. H. Wenzel A Jātaka tale. JRAS XX. 503—511. XXI. 179. Hiouen-Thsang II. 131—140.

1) Cf. L. Feer: Les Jâtakas dans les Mémoires de Hiouen-Thsang. A. XI. C. I. Or. P. 1899 I. pp. 150—169.

2) A. Foucher: L'art Bouddhique dans l'Inde. R. H. R. 1899 XXX. 322—323.

3) L. Feer: Le Bodhisattva et la famille de Tigres. J. A. 9. XIV. 272 sqq.

4) Sur ce nom de Sudaṃṣṭra (qui se trouve aussi dans le Lal.-v. 194. 10) donné évidemment à Vessantara et ses transcriptions et traductions chinoises cf. L. Feer dans A. X. C. I. O. (Genève) IIᵉ p. sect 1 et 1bis, 177—186 et S. Lévi J. A. 9. XV. 324.

5) С. Ф. Ольденбургъ: Замѣтки о буддійскомъ искусствѣ dans Восточныя Замѣтки. С.-Петерб. 1894, pp. 340 sqq.

6) L. de Lavallée Poussin. J. R. A. S. 1894, pp. 297—319.

19. Sunetra	?
20. Puṇyaraçmi	Rāṣṭrapālaparipṛcchā.
21. Kāñcanavarṇa	B. A. K. L. 42 (?) (Kanakavarṇa).
22. Utpalanetra pārthiva	?
23. Keçava vaidyarājan	?
24. Sarvadarçin	?
25. Kusuma	?
26. Arthasiddhi nṛpa	?
27. Āçuketu	?
28. Sarvadarçi nṛpa	?
29. Jñānavatī	Samādhirāja ch. XXXI.
30. Rūpavatī	Divyāv. 32 B. A. K. L. 51. Bunyiu N. № 270.
31. Viçrutaçrī-nṛpa	?
32. Kṛtajña	Kalpadrumāvadānamālā XXXIV. Dsanglun XXXIII. B. A. K. L. 45.
33. Godha	?
34. Kapiñjala	Vinaya II. 161. J. 37. St. Julien Avadān. II. 17—20. B. A. K. L. 86. Hiouen Thsang I. 360—361.
35. Vānara	J. 516. cf. le № 37.
36. Mātupoṣaka	J. 455. Mhv. II. 139 sqq. Beal R. L. 366—368. Bhadrakalpāvadāna XXXII Ajaṇṭā Cave XVII [1]).
37. Ṛkṣapati	Karmaçataka. cf. J. 516. Ajaṇṭā Cave XVII [1]). cf. le № 35.
38. Ṣaḍdanta	J. 514 [2]). Kalpadrumāvadānamālā 22. B. A. K. L. 49. Ajaṇṭā Cave X [1]). Deux versions chinoises sont encore mentionnées par M. Feer [2]).
39. Vartakapotaka	J. 35. Cariyāpiṭaka 29. Hiouen-Thsang I. 360. J. m. 16. Boro-Boedoer pl. CXLVIII [1]).
40. Ruru	J. 482. Cariyā p. 16. J. m. 26. Bharhut XXV. 1 [1]). Ajaṇṭā Cave II [1]). Boro-Boedoer pl. CLIX. 9 [1]).
41. Kacchapa	B. A. K. L. 97. Boro-Boedoer pl. CLXXX [1]).
42. Matsya	Avadānaçataka 31. B. A. K. L. 99. Dsanglun XXVI. Sung-Yun l. c. CII.
43. Saumya	?
44. Siṃha	Mahāvastu I. 131—132. Dsanglun XLIX.
45. Hayarājan	cf. 18. Boro-Boedoer CCCLXXXIX [1]). Mhv. III. 67—90.
46. Kuṇāla-pakṣin	J. 536.
47. Çaça ?	J. 316. J. m. 6. Cariyā p. 10. Avadānaçataka 37. B. A. K. L. 104. Hiouen Thsang I. 374—376. Boro-Boedoer pl. CXXXXIX. [1]).
48. Çuka	J. 429. 430.
49. Vānararājan	J. 404 ou 407. J. m. 27. Cariyā p. 27.
50. Çuka	J 484. St. Julien, Avadān. I. 68—70.

1) Ольденбургъ l. c.
2) L. Feer: Le Chaddanta-Jātaka. J. A. 1895.

A l'énumération des cinquante jâtakas succède brusquement une prophétie sur la future décadence de l'Eglise, terminée par une pieuse exhortation (28—33). La prophétie est en réalité un tableau satirique des mœurs relâchées du clergé buddhique. La vivacité et la précision de cette peinture, qui reflète sans doute des faits réels, en font un intéressant document d'histoire religieuse: c'est pourquoi nous ne croyons pas hors de propos d'en donner la traduction, encore que la barbarie du langage rende, en plus d'un passage, le sens douteux.

Telles sont les sublimes observances que j'ai pratiquées durant ma carrière. Quand ils en entendront le merveilleux récit, ils n'en seront point aussitôt touchés. C'est avec des éclats de rire qu'ils l'écouteront, ainsi que mon enseignement, ces hommes adonnés à la gourmandise et à la luxure, toujours sous l'empire de l'indolence, en proie à cent désirs, ennemis de la loi, vils, corrupteurs de la doctrine, dénués de toute vertu. Et en entendant cette loi sainte, il diront: «Ce n'est point là le langage du Jina. J'avais un maître qui était un océan de science: il était très érudit et éloquent au plus haut point. Or il a combattu cette doctrine, qui n'est en aucune façon la parole du Buddha. En outre il eut lui-même un vieux maître, qui avait maîtrisé le torrent des mérites, et qui n'y adhérait pas davantage. Ne vous y attachez pas: elle est fausse. Dans un système où il n'y a ni Moi, ni principe vital, ni personnalité, inutile est l'effort de la lutte, la pratique de la vertu, l'œuvre de la contrainte morale. Si même le Mahāyāna existe, mais sans qu'il admette la réalité du Moi ou de l'homme, la peine, que je me donne est inutile puisque je ne puis atteindre à la réalité du Moi. Toutes ces théories ont été imaginées par des sophistes et des hérétiques. Jamais le Jina n'a pu prononcer de telles paroles, qui sont un affront aux religieux.»

Dénués de pudeur et de moralité, impudents comme des corneilles, hautains, irascibles, dévorés de jalousie, d'orgueil et d'infatuation: voilà ce que seront les religieux de mon Eglise. Ils agitent les mains et les pieds; ils secouent les coins de leur robe; le kāṣāya au cou, ils parcourent les maisons des villages, ivres d'eau de vie. Ils prennent la bannière du Buddha et vont faire la cour aux maîtres de maison. Ils ont toujours sur eux un écrit édifiant; quant à accumuler des mérites, ils n'y songent guère. Les dons de vaches, d'ânes, de chevaux, de bétail les rendent esclaves: adonnés à l'agriculture et au commerce, leur esprit est toujours plein d'abjectes

préocupations. Pour eux il n'est pas de parole déshonorante; il n'est rien qu'ils ne soient capables de faire: biens des stūpas, biens de la communauté, biens privés, c'est tout un pour eux. S'ils voient dans leurs rangs un religieux vertueux, ils le dénigrent; vicieux, fourbes, charlatans, cruels, ils séduisent une femme et la perdent. Un maître de maison est possédé de désirs comme ils en sont possédés, eux qui ont quitté le monde. Ils auront des femmes, des fils et des filles, comme les maîtres de maison. Celui au foyer de qui ils trouvent toutes les jouissances en vêtements et en nourriture, de celui-là même ils convoitent la femme, esclaves de leurs penchants, toujours vils.

«Ne vous livrez pas à ces plaisirs; ils vous feraient déchoir à la condition d'animal, de preta, de damné.» Voilà ce qu'ils répètent sans cesse aux maîtres de maison; mais ils ne sont eux-mêmes ni domptés, ni apaisés. Et comme eux-mêmes ne sont pas domptés, leurs disciples ne le sont pas. Leurs jours et leurs nuits se passeront en repas, en débauches et en bavardages. S'ils accueillent des disciples, ce n'est pas pour les former à la vertu, mais pour en faire leurs courtisans. «Entouré de mes propres disciples (se disent-ils), il me sera facile d'inspirer du respect au peuple.» Et ils disent à la foule: «Si j'accueille ces disciples, c'est par compassion pour eux. Je ne leur demande aucun service.»

Rongés de maladies, lépreux, marbrés, difformes, ils iront en enfer, revenant sans cesse, toujours vils.

Etrangers à la règle et à la contrainte morale, dénués des qualités du religieux, ils ne sont ni maîtres de maison ni religieux; on les évite comme le bois du cimetière. Ils n'ont aucun respect des Çikṣās, du Pratimoksa ni du Vinaya. Ils sont lâchés, ils vont à leur fantaisie, comme des éléphants hors de la portée du croc. Demeurant dans la forêt, ils seront en pensée au village; poussés par le feu des passions, leur pensée n'a point de fixité. Mettant en oubli les qualités de buddha, les prescriptions, les exhortations et les moyens de succès, pleins d'infatuation, d'orgueil et de présomption, ils tombent dans le terrible Avīci.

Ils se plaisent à entendre raconter des histoires de rois, des aventures de voleurs. Ils s'attachent à entretenir leurs parents. Ils sont préoccupés jour et nuit. Négligeant la méditation et l'étude, ils s'appliquent sans cesse aux intérêts du monastère, fronçant le sourcil contre les vautours de la maison, entourés de disciples mal domptés. «Je ne suis pas (disent-ils) un serviteur du couvent; c'est pour moi seul qu'il a été fait. Les religieux qui me conviennent trouveront seuls place au couvent.» Ceux qui sont sages, vertueux, pieux, appliqués à faire du bien aux hommes, à se dompter et se contraindre, toujours recueillis, ils refusent de les admettre: «Cette place m'est assignée, celle-ci est à mon confrère, celle-là à mon camarade. Va-t-en, il n'y a pas de place ici pour toi. Tous les lits et les sièges ont été distribués; il y a beaucoup de moines établis ici; il n'y a plus rien à prendre chez nous. Que mangeras-tu ici? Passe ton chemin, moine.»

La règle du lit et de la chaise n'existera pas pour eux; ils seront riches comme des maîtres de maison, ils auront autour d'eux des provisions à foison.

A la fin, ils seront méprisés de tous, eux mes fils: car ils habiteront le bord des forêts, mais sans garder ma parole en mémoire.

Ah! l'enseignement du plus grand des Jinas, il ne sera pas loin de sa ruine, lorsqu'y apparaîtront en tel nombre des moines esclaves de la convoitise, ennemis de la vertu!

Et ceux-là seront, à l'époque dernière, un objet de dérision, qui, appliqués à la morale et à la vertu, habiteront les forêts, loin des villages et des villes. Les autres, toujours choyés, dénués de vertus, artisans de discordes, calomniateurs, friands de querelles, seront acceptés comme docteurs par le monde, et ils seront dévorés d'orgueil et d'infatuation. Ma doctrine, réservoir de vertus, mine de toutes les vertus, souverainement délicieuse, tombera en ruine par la perversion de la morale, par les vices de l'envie et de l'infatuation. Comme une mine de gemmes pillée, comme un étang de lotus desséché, comme un pilier, orné des plus rares joyaux, mis en pièces, ainsi périra ma doctrine aux derniers temps.

Seconde partie. Après un nouveau développement sur les vices qui éloignent le bodhisattva de la bodhi (34—36) commence sans transition un jâtaka qui forme toute la seconde partie.

Jadis — il y a de cela d'innombrables kalpas — vivait le Buddha Siddhārthabuddhi. A la même époque régnait dans le Jambudvīpa le roi Arciṣmat, dont la capitale était Ratnaprabhāsa. Il avait un fils nommé Puṇyaraçmi. Une nuit le jeune prince fut réveillé par les chants des devas Çuddhāvāsakāyikas, qui voulaient le prémunir contre les dangers de l'insouciance. A la suite de cet avertissement, il resta plongé pendant dix ans dans une méditation silencieuse, indifférent aux choses extérieures (36—39). Cependant le roi fait bâtir, pour servir de résidence à son fils, une grande ville qu'il nomme Ratipradhāna. Le prince y vit, dans un magnifique palais, entouré de jeunes compagnons, de

belles jeunes filles et de tous les objets qui peuvent flatter les sens. Mais cette société empressée à lui plaire lui apparaît comme une troupe d'ennemis qui lui barre le chemin de la délivrance: aussi persévère-t-il dans son indifférence (39—42). Averti de cette étrange conduite, le roi Arciṣmat, accompagné de 80,000 rājas, vient trouver son fils et l'engage à goûter les plaisirs de son âge: Puṇyaraçmi refuse et persiste dans son abstention (42—45). Une nuit, il entend dans les airs les devas Çuddhāvāsakāyikas qui chantent les louanges du Buddha Siddhārthabuddhi. Il prend la résolution d'aller le trouver; mais, de peur d'être arrêté aux portes, il se jette du haut de la terrasse du palais, en priant le Buddha de l'amener à lui. Celui-ci, étendant la main droite, émet un flot de lumière qui s'épanouit en un large lotus; Puṇyaraçmi y prend place et se trouve en un instant aux pieds du Buddha, à qui il adresse une fervente prière 45—50). Après avoir écouté de sa bouche l'enseignement de la bodhicaryā, il reçoit la dhāraṇī Vimokṣā et les cinq abhijñās. Se tenant en l'air, il fait pleuvoir des fleurs sur le Tathāgata et chante son éloge (50—56). Pendant ce temps le roi Arciṣmat, réveillé par les gémissements des femmes, apprend la disparition de son fils et se met en pleurant à sa recherche. La devatā de la cité lui apprend qu'il est parti vers l'Orient pour rendre hommage au Buddha. Le roi, accompagné des femmes du prince et d'une suite nombreuse, s'y rend aussitôt et chante des gāthās en l'honneur du Buddha (54—56). Puṇyaraçmi invite le Maître à prendre son repas le lendemain dans son palais avec tous les Bhikṣus: cette invitation est acceptée. Description de la fête (56—57).

Après avoir fait ce récit à Rāṣṭrapāla, le Buddha en identifie les personnages: lui-même était Puṇyaraçmi; Arciṣmat, c'est le Tathāgata Amitāyus; la devatā de la ville, le Tathāgata Akṣobhya (57—58). Exhortation finale (58—60).

La langue de la Rāṣṭrapālaparipṛcchā n'offre rien de notable dans les parties en prose; dans les passages en vers, elle a l'apparence d'un sanscrit déformé, d'après l'analogie du prâcrit, par un versificateur malhabile, pour répondre aux exigences du mètre. Sans chercher à en faire une étude complète, nous indiquerons les principales particularités qui s'y rencontrent.

Les voyelles longues s'abrègent selon les nécessités du vers: *ā* > *ă*. Ex. praçānta 3, 13; vandamo 5, 6; kṛtva 5, 11. — *aṃ*, *āṃ*, *ān*, *aḥ* > *a* ou *u*. Ex. vaya 27, 10; ahu 27, 6; imu 17, 1; — pūja 5, 11; nāyakāna 12, 8; — acintya 54, 17; — āçrayu 26, 18. Les diphtongues s'abrègent, *e* en *i*, *o* en *u* ou *a*: paṅki 20, 17; uddiçana 31, 11; — prabhāsu 3, 14; prajñupāya 5, 16; çāsamānu 7, 12; tenupanīta 26, 4; citrita 3, 6.

Les voyelles brèves se changent en la longue et quelquefois en la diphtongue correspondante: ainsi *ă* devient *ā*, *ŭ* devient *ū* ou *o*: cā 45, 22; sūratāḥ 13, 5; anopalambha 12, 10; koṇāla 43, 3.

Un groupe consonantique, surtout s'il s'agit d'une consonne redoublée, peut se réduire à une seule consonne: acāracarikām (= acārac carikām) 5, 13; jagadharma (= jagaddharma) 7, 12; madharmam (= maddharmam) 17, 15; kadāci buddho (= kadācid buddho) 18, 15.

Le sandhi est assez régulier. On constate parfois l'hiatus (bodhiaṅga 47, 3); le sandhi du second degré (kṣitiçopaviṣṭo 45, 7); l'intercalation de lettres euphoniques (dhyāna-m-upāya 54, 19; sahitva-m-açeṣam 21, 5; anapekṣya-d-asaṃgha 22, 18).

Les formes prâcrites proprement dites ne sont pas très nombreuses: enti 5, 10; bhoti 14, 3; bhonti 11, 15; nirbhacchito 32, 14; amaccharāḥ 37, 16; çruṇitvā 28, 3; guhmitā 47, 3 etc.

La désinence du nominatif pluriel est quelquefois remplacée par l'allongement de la finale du thème: asaṃgabuddhī 15, 2; bhikṣū 30, 10; araṇyavanavāsī 31, 18. Dans les thèmes en *a*, le vocatif en *ā* est fréquent, surtout à la fin d'un pāda (par ex. 57, 13—14).

Les pronoms ont des formes très irrégulières: anyāna (= anyeṣām) 21, 4; itu (= eṣā) 27, 9; ima (= etad) 32, 1.

La conjugaison présente deux irrégularités extrêmement fréquentes: la confusion de la 1ère et de la 3e personne (par ex. 23, 4 et vers suivants), et celle du singulier et du pluriel (6, 16; 15, 1. 2. 17; 14, 10; 28, 18; 31, 6; 46, 6; 52, 7).

Le passif prend les désinences de l'actif: vidyati 20, 5; badhyati 21, 2; jāyati 32, 10.

La métrique n'est guère moins flottante que la grammaire. Ainsi une voyelle devant deux consonnes peut être brève: dharmă çrutvă 5, 11; tyaktă stanadvayam 25, 1; yāntĭ kṣetra 5, 12. Le mètre survit à l'addition ou à la suppression d'une syllabe initiale. La résolution d'une longue initiale en deux brèves est un fait normal.

Les mètres employés dans notre texte sont les suivants:

1. **Meghavitāna** ⏑⏑– ⏑⏑– ⏑⏑– –

s'emploie en combinaison avec le **Dodhaka**.

2. **Indravajrā** ––⏑ ––⏑ ⏑–⏑ ––
3. **Upendravajrā** ⏑–⏑ ––⏑ ⏑–⏑ ––

Ces deux mètres se combinent entre eux et avec 6—7.

4. **Bhramaravilasita** ––– –⏑⏑ ⏑⏑⏑ ⏑–
5. **Dodhaka** –⏑⏑ –⏑⏑ –⏑⏑ ––
6. **Rathoddhatā** –⏑– ⏑⏑⏑ –⏑– ⏑–
7. **Indravaṃçā** ––⏑ ––⏑ ⏑–⏑ –⏑–
8. **Vaṃçasthā** ⏑–⏑ ––⏑ ⏑–⏑ –⏑–

Ces deux mètres se combinent entre eux et avec 1—2.

9. **Pramitākṣarā** ⏑⏑– ⏑–⏑ ⏑⏑– ⏑⏑–
10. **Vasantatilakā** ––⏑ –⏑⏑ ⏑–⏑ ⏑–⏑ ––
11. **Mālinī** ⏑⏑⏑ ⏑⏑⏑ ––– ⏑–– ⏑––
12. **Pañcacāmara** ⏑–⏑ –⏑– ⏑–⏑ –⏑– ⏑–⏑ –
13. **Çārdūlavikrīḍita** ––– ⏑⏑– ⏑–⏑ ⏑⏑– ––⏑ ––⏑ –
14. **Sragdharā** ––– –⏑– –⏑⏑ ⏑⏑⏑ ⏑–– ⏑–– ⏑––
15. **Puṣpitāgrā** ⏑⏑⏑ ⏑⏑⏑ –⏑– ⏑––, ⏑⏑⏑ ⏑–⏑ ⏑–⏑ –⏑– –
16. ? –⏑– ⏑–⏑ –⏑– ⏑–⏑ –⏑– ⏑–

Ce mètre s'emploie en combinaison avec 11.

17. ? ––– ⏑⏑– ⏑–⏑ –⏑⏑ ––
18. ? ––⏑ –⏑⏑ ⏑––, –⏑⏑ –⏑– ⏑⏑⏑ ––

Il existe deux versions chinoises de la Rāṣṭrapālaparipṛcchā, l'une de Jñānagupta, 589—618, (Bunyiu Nanjio 23 [18]) l'autre de Che-hou (Dānapāla?), 980—1000 (B. N. 873). J'ai pu les utiliser dans une certaine mesure grâce à l'obligeance de M. Paul Pelliot qui s'est imposé la peine de les collationner pour moi.

La traduction tibétaine se trouve dans le Kandjour Mdo XIII. 9. Le texte du Kon-Tśegs IV. 15 paraît être analogue au nôtre[1]).

Cette édition a été faite d'après un Ms. unique conservé à la Bibliothèque de l'Université de Cambridge sous la cote Add. 1586, et décrit dans le Catalogue de M. Bendall, p. 130 et 206. Le Ms. de la Bibliothèque Nationale Devanāgarī 83 n'étant manifestement qu'une copie du premier, je n'avais pas à en tenir compte.

Je remercie l'Université de Cambridge de la libéralité avec laquelle ce manuscrit a été mis à ma disposition, et particulièrement M. le Prof. Neil, dont l'obligeante entremise a aplani tous les obstacles qui auraient pu en retarder la communication.

Comme les autres éditeurs de la Bibliotheca Buddhica, j'ai une dette de gratitude envers le savant directeur de cette collection, M. Serge d'Oldenburg, qui a dirigé l'impression avec le zèle désintéressé qui lui est habituel.

Je suis obligé d'ajouter un mot personnel. Ce travail, commencé à Paris, s'achève dans une pagode annamite, entre deux étapes, parmi les embarras d'un long voyage et les soucis d'une tâche laborieuse. J'espère qu'on voudra bien en excuser les lacunes et les négligences, considérant que les circonstances ne m'ont pas permis de donner à cette œuvre tout le temps qui eût été nécessaire pour la rendre plus digne du public savant et surtout du maître respecté qui a bien voulu accepter qu'elle lui fût dédiée.

Mong Duc (Annam),
7 novembre 1899.

Louis Finot.

1) L. Feer-Csoma. Analyse du Kandjour. A. M. G. II. 451.

P. S. Des circonstances indépendantes de notre volonté ont retardé jusqu'à présent la publication de cet ouvrage. L'introduction et les index ont été imprimés, en mon absence, par les soins de M. S. d'Oldenburg, à qui est due, en outre, l'identification des jātakas (pp. VI—VIII). M. Sylvain Lévi a bien voulu s'imposer la tâche de corriger les épreuves. Nous devons à l'obligeance de M. Bendall de pouvoir donner ici les variantes des quatre passages cités par le Çikṣāsamuccaya (pp. 13, 4–9; 20, 5–8; 35, 19–20; 50, 9 à 53, 8 de notre édition).

Paris, 22 avril 1901. L. F.

VARIANTES.

13, 4.	Çi. 196, 1.	cintānapekṣāḥ.
13, 6.	Çi. 196, 3.	strīsaṃbhava.
13, 7.	Çi. 196, 4.	khaḍgasadṛçāḥ.
13, 8.	Çi. 196, 5.	harṣati (MS. harṣani) mano.
20, 5.	Çi. 54, 17.	yasya adhimukti (*yasya* est une addition marginale d'une autre main).
20, 7–8.	Çi. 55, 1–2.	°cyuto manujeṣu ... | ... tiryagatīṣu.
50, 10.	Çi.	jñānaparā ... virajā |
50, 11.	Çi.	keçanakhā.
50, 12.	Çi.	bhruvi tavorṇṇamukhe.
50, 14.	Çi.	te hitakaraṃ asama.
50, 15.	Çi.	tāmranibhā.
50, 16.	Çi.	te snigdhamadhuragirā.
50, 19.	Çi.	te snigdhamadhurasatya°.
51, 3.	Çi.	na samo ... rājagate |
51, 4.	Çi.	°taṭān.
51, 5.	Çi.	°varṇanibhā |
51, 6.	Çi.	na prekṣya yāti jagat.
51, 7–8.	Çi.	°cīrṇatapāḥ ... | ... manāḥ ... kāruṇikam.
51, 9–10.	Çi.	sudṛḍhaḥ | ... jñānadharaṃ ||
51, 11.	Çi.	kugaṇapramathī.
51, 17–18.	Çi.	anutpādaçāntaçūnyanayaṃ avijñānam eva ... | .. avatārayasy atīkṛpālutayā ||
52, 1–2.	Çi.	°çataiḥ saṃbhrāmitaṃ ... | vaidyopamo.
52, 4.	Çi.	jagad avekṣya.
52, 6.	Çi.	mārgavaram ||
52, 9.	Çi.	hy akarkaça.
52, 11–12.	Çi.	satyāryavākyamanapāyanayaiḥ ... | ... janayanti çamam ||
52, 16.	Çi.	सुशुभान, corr. suçubhān.
52, 18.	Çi.	paranirmito 'pi ca sa°.
53, 2.	Çi.	spṛçate padañ ca paramaṃ virajaṃ.
53, 4.	Çi.	viraji.
53, 5–6.	Çi.	puṇyārthikasya ... nidhe ... | ... bodhivarām ||
53, 10.	Çi.	sukhaṃ labhate.
53, 11.	Çi.	prabhṛtiṃ (au lieu de prasṛtaṃ).
53, 13.	Çi.	vigatajvarā ... asamakāruṇikāḥ ||
53, 14.	Çi.	kṣamaratā.
53, 15.	Çi.	labdhā ... gagane sthitena te niçamya ... | sugatāpratimo.
53, 18.	Çi.	yad arjitam.

CORRECTIONS.

VIII, № 50. Ajouter: *MBh. Anuçāsanap.* V.

8, 14. Lire बोधि……संभवः

16, 8. » मृगेव……पूजनेन

24, 13. » पाणि

25, 5. » यद् कृतज्ञः.

35, 20. » मानवशेन

37, 2. » राज्ञार्चिष्मान्

39, 16. » रतिप्रधानं

50, 12. » भुवि वरे

51, 18. » युक्तिशतैरवतारयसि

52, 3. » परिदेवशतैः et effacer la note.

52, 15. » बलचक्रवर्त्यपि

59, 11. » भवितारः

राष्ट्रपालपरिपृच्छा ।

I.

निदानपरिवर्तः प्रथमः ।

नमः सर्वबुद्धबोधिसत्त्वार्यश्रावकप्रत्येकबुद्धेभ्यः ॥

[1]भास्वत्सद्धर्मरत्नव्यतिकरघटितां [2]स्पष्टमां विश्वकारां
त्रैलोक्योत्कृष्टसंपत्सुगतपदमहास्वर्गसोपानमालां ।
[3]पौराणं पुण्यमार्यं चरितमविकलं सच्च यस्मिन्मुनीन्द्रस्
तत्सूत्रं राष्ट्रपालं शृणुत भवसरित्संक्रमं गौरवेण ॥

एवं मया श्रुतमेकस्मिन्समये भगवान्राजगृहे विहरति स्म गृध्रकूटे पर्वते महता भिक्षुसंघेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः पञ्चभिश्च बोधिसत्त्वसहस्रैः सर्वैरसंगप्रतिभानैः क्षान्तिप्रतिलब्धैर्निहतमारप्रत्यर्थिकैः सर्वबुद्धधर्मात्यासन्नीभूतैरेकजातिप्रतिबद्धैर्धारणीप्रतिलब्धैः समाधिप्रतिलब्धैरनन्तप्रतिभानप्रतिलब्धैरसङ्गवैशारद्यप्रतिलब्धैर्ऋद्धिवशितापरमपारमिप्राप्तैर्यावत्सर्वगुणावर्णपर्यादत्तैः । तद्यथा । समन्तभद्रेण च नाम बोधिसत्त्वेन महासत्त्वेन समन्तनेत्रेण च बोधिसत्त्वेन महासत्त्वेन समन्तावलोकितेन च समन्तरश्मिना च समन्तप्रभेण च उत्तरमतिना च वर्धमानमतिना च अनन्तमतिना च विपुलमतिना च

1) Mètre Sragdharā. Cette stance manque dans les versions chinoises.

2) MS. स्पष्टमा विश्वकार्.

3) MS. पौराणां.

अनुपममतिना च धरणींधरेण च जगतींधरेण च जयमतिना च विशेषमतिना च धारणीश्वरराजेन च बोधिसत्त्वेन महासत्त्वेन। मञ्जुश्रीप्रमुखैश्च षष्टिभिरनुपमचित्तैर्भद्रपालपूर्वंगमैश्च षोडशभिः सत्पुरुषैर्ब्रह्मणा च सहांपतिना शक्रेण च देवानामिन्द्रेण चतुर्भिश्च लोकपालैः सुसीमेन च देवपुत्रेण सुस्थितमतिना च देवपुत्रेण सर्वैश्च देवेन्द्रैर्नागेन्द्रैः किन्नरेन्द्रैर्गन्धर्वेन्द्रैर्यक्षेन्द्रैरसुरेन्द्रैर्गरुडेन्द्रैः सर्वैरनेकजातिशतसहस्रपरिवारैस्तत्रैव पर्षदि संनिपतितैः संनिषण्णैः॥

अथ खलु भगवाञ्छ्रीगर्भसिंहासने संनिषण्णो मेरुरिवाभ्युद्गतः सर्वपर्षन्मण्डलात्सूर्य इव सर्वलोकमवभासयन्। चन्द्र इव सर्वजगदवभासयन्। ब्रह्मेव प्रशान्तविहारी शक्र इव उदारमहाकायश्चक्रवर्तीव सप्तबोध्यङ्गरत्नसमन्वागतः। सिंह इवानात्मशून्यसर्वधर्मवादी। अग्निस्कन्ध इव सर्वजगदवभासकरः सर्वदेवप्रभासमणिरत्नसमुच्चयमणिराजवद्देदीप्यमानः सर्वं त्रिसाहस्रमहासाहस्रं लोकधातुमाभया स्फुरित्वा ब्रह्मस्वर[2 a]रुतरवितेन[1] सर्वसत्त्वविज्ञापनानुगतेन घोषेणाशुविनिश्चितार्थः सर्वधर्मपरमपारमिप्राप्तः पर्षद्गतो धर्मं देशयति स्म। आदौ कल्याणं मध्ये कल्याणं पर्यवसाने कल्याणं स्वर्थं सुव्यञ्जनं केवलं परिपूर्णं परिशुद्धं पर्यवदातं ब्रह्मचर्यं संप्रकाशयति स्म॥

अथ खलु प्रामोद्यराजो नाम बोधिसत्त्वो महासत्त्वस्तस्यामेव पर्षदि संनिपतितोऽभूत्संनिषण्णः। स भगवन्तं सिंहासनस्थं सूर्यसहस्रातिरेकया प्रभया सर्वपर्षन्मण्डलं जिह्मीकुर्वन्तमतीव विरोचमानं दृष्ट्वा हृष्टतुष्टः प्रसादावर्जितहृदय उत्थायासनात्कृतकरपुटो भगवन्तमाभिर्गाथाभिरभ्यष्टावीत्।

[2]अभिभूय जिनो जगदेतान् देवगणासुरकिन्नरनागान्।
श्रावक[3]बुद्धसुतान्मेरुतेजा भासति हेमगिरिः स यथैव॥

1) MS. रवितेन.

2) Mètre Dodhaka. La 1ère syllabe est supprimée dans les vers 1, 2 et 11.

3) D'après les versions chinoises, *buddhasuta* est partout synonyme de *bodhisattva*.

मेरुरिवामरसंघनिवासः सागरमध्यगतोऽपि विराजन्।
कृपसागरमध्यगतोऽसौ मुञ्चति रश्मिसहस्रशतानि॥

ब्रह्मविहारगतः स च ब्रह्मा ब्रह्मपुरस्थ[1] इवाभिरराज।
ध्यानविमोक्षसमाधिविहारी भासति सर्वजगे वरसत्त्वः॥

शक्र इव त्रिदशेषु विराजन् देवतमध्यगतः पृथुतेजाः।
भासति सर्वजगे मुनिराजा लक्षणचित्रित ज्ञानगुणाढ्यः॥

द्वीपचतुर्नृपतिर्न्यवभासी शोभति लोकमिमं त्वनुभासन्।
आर्यपथे च नियोजयमानः शोभति एष कृपाशयबुद्धिः॥

अग्निमणिप्रभध्यामकरोऽसौ भासति खे प्रतिपन्निव सूर्यः।
सूर्यसहस्रविशिष्टप्रभासो भासति बुद्धरविर्जगतीह॥

चन्द्र इवामल भाति निशीथे भासति सर्वजगेषु विशुद्धः।
पूर्णशशाङ्कनिभं जिनवक्त्रं सर्वप्रभामभिभूय विभाति॥

पर्वतमूर्धनि अग्निर्यथैव रात्रिप्रशान्त प्रभासति सत्त्वान्।
मोहतमो निखिलं विनिहत्य भासति ज्ञानप्रभासु महर्षिः॥

पर्वतकन्दरधीरनिनादी त्रासयतीह मृगान्भुवि सिंहः।
शून्यनिरात्मनिनादिनरेन्द्रस् त्रासयते हि तथापरतीर्थ्यान्॥

1) Selon les traducteurs chinois, *purastha* = *puraḥstha*, «supérieur».

सन्मणिराज इवोज्ज्वलतेजा भासति सर्वमणीनभिभूय ।
काञ्चनवर्णनिभो जिनकायो भासति सर्वजगत्यभिभूय ॥

न च ते ऽस्ति समः क्वचिल्लोके उत्तरि नापि च विद्यति सत्त्वः ।
पुण्यतु ज्ञानतु वीर्यउपायैः सर्वगुणैश्च समो न तवास्ति ॥

भासयते हि जगन्नरवीरो दृष्टु मया गुणसागर नाथः ।
गौरवजातविवर्धितप्रीतिः पादतले पतितो ऽस्मि जिनाय ॥

स्तुत्य मया रूपसागरबुद्धिं सर्वगुणाकर लो[2b]कप्रदीपं ।
पुण्यमुपार्जितमत्र तेन सर्वजगत्स्पृशतां वरबोधिं ॥

अथ खलु प्रामोद्यराजो बोधिसत्त्वो महासत्त्वो भगवन्तमाभिर्गाथाभिरभिष्टुत्य कृताञ्जलिपुटो ऽनिमिषाभ्यां नयनाभ्यां तथागतकायमवलोकयन्धर्मधातुमेव विचारयमाणो गम्भीरं दुरवगाहं दुर्दृशं दुरनुबोधमतर्क्यं तर्कापगतं शान्तं सूक्ष्मं चानुप्रविशन् । अचिन्त्यं बुद्धगोचरमनुविचारयमाणः । सर्वधर्मधातुप्रसृतं तथागतज्ञानमनुचिन्तयमानः । असमसमं बुद्धविषयं संपश्यमानः । अचिन्त्यं तथागतोपायविषयगोचरमवतरन् । धर्मधातुनयस्वभावावतारतां च बुद्धानां भगवतामवकल्पयमानः । अनालयगगनगोचरा हि बुद्धा भगवन्त इति संपश्यन् । भूतकोट्यकोटिस्वभावावतारं सर्वधर्माणामित्यधिमुच्यमानः । अनावरणं च बुद्धविमोक्षमभिलषमाणः । ध्रुवं शिवं शाश्वतं च बुद्धानां भगवतां कायमित्यवतरमाणः । सर्वबुद्धक्षेत्रप्रसरानुगतां सर्वसत्त्वाभिमुखतां च तथागतकायस्यावतरन् । अपरान्तकल्पकोटिभिरपि नास्ति बुद्धानां भगवतां गुणपर्यन्त इत्यनुस्मरन् । प्रामोद्यराजो बोधिसत्त्वो महासत्त्वस्तूष्णीव्यवस्थितो ऽभूत् । धर्मधातुमेव विचारयमाणः ॥

तेन खलु पुनः समयेनायुष्मान्राष्ट्रपालः श्रावस्त्यां त्रैमास्यं वर्षमुपगतः[1] । त्रैमास्यात्य-

1) MS. वर्षा°.

येन कृतचीवरो निष्ठितचीवरः सपात्रचीवरमादाय भिक्षुसंघेन सार्धं नवकैरादिकर्मिकैरचिरप्रव्रजितैरनुपूर्वेण जनपदचारिकां चरन् येन राजगृहं महानगरं येन च गृध्रकूटः पर्वतराजस्तेनोपसंक्रान्तः ॥

अथ खल्वायुष्मान्राष्ट्रपालो येन भगवांस्तेनोपसंक्रामदुपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य भगवन्तं त्रिष्प्रदक्षिणीकृत्यैकान्ते ऽतिष्ठत् । एकान्तस्थितश्चायुष्मान्राष्ट्रपालः कृताञ्जलिपुटो भगवन्तमाभिर्गाथाभिरभ्यष्टवीत् ॥

[1]वन्दमो नरवरं प्रभंकरं वन्दमो गगनतुल्यमानसं ।
वन्दमो विमतिच्छेदकं जिनं वन्दमो त्रिभवपारगं मुनिं ॥

कीर्तयन्ति तव वर्णनायकाः क्षेत्रकोटिप्रसरात्समन्ततः ।
श्रुत्व बुद्धसुत एन्ति हर्षिताः पूजनाय गुणसागरं [3a] मुनिं ॥

पूज कृत्व सुगतानुरूपतो[2] धर्म श्रुत्व विरजं महामुनेः ।
यान्ति क्षेत्र स्वक हृष्टमानसा वर्णमाल तव तां प्रभाषतः ॥

कल्पकोटिनयुतानचिन्तियान् सत्त्वकारणमचारचारिकां ।
नो[3] च अस्ति तव खिन्न मानसं एषमाण वरबोधिमुत्तमां ॥

दानशीलचरितो ऽसि नायका क्षान्तिवीर्य अपि ध्यानशिक्षितः ।
प्रज्ञुपाय सद पारमिं गता तेन वन्दमि महाविनायकं ॥

[4]ऋद्धिपादवरभिज्ञकोविदम् इन्द्रियैर्बलविमोक्षशिक्षितं ।
सर्वसत्त्वचरिते गतिं गतं वन्दमो असमज्ञानपारगं ॥

1) Mètre Rathoddhatā.

2) MS. सुगतान°.

3) MS. मनो च असि.

4) MS. ऋद्धिपावर°. Chinois: «les quatre ṛddhipādas et les six abhijñās».

चित्तधार जगतः प्रजानसे या चरिर्यथ च कर्मसंभवः।
येन वा नयमुखेन मुच्यते तं च वेत्सि भगवन्नरोत्तमा॥

रागदोषज हि मोहसंभवं येन सत्व त्रिरपायगामिनः।
येन यान्ति सुगतिं च कर्मणा जानसे सुकृतदुष्कृतं जगे॥

ये जगद्धितकरा अतीतकाः सांप्रतं च नरदेवपूजिताः।
ये अनागत गुणाग्रपारगास् तांश्च सर्वसुगतान्प्रजानसे॥

क्षेत्रशुद्धिरपि चापि संभवो बोधिसत्वगणाः श्रावकास्तथा।
यावदायुरथ वा महर्षिणां सर्वथा ह्यखिलतो विजानसि॥

निर्वृतौ च स्थिति धर्म यादृशी यादृशी च जिनधातुपूजना।
धर्मकोशधर तत्र यादृशा तान्प्रजानसि नरोत्तमाखिलान्॥

(1) ज्ञान दशबलस्य विदितं ह्यनावृतं वर्तते सततमध्वसु त्रिषु।
सर्वधर्मनययुक्तमानसा ज्ञानसागर जिना नमो ऽस्तु ते॥

नास्ति ते समसमः कुतोत्तरो लक्षणैश्च प्रतिमण्डिताश्रयः।
तारकाभिरिव खं विचित्रितं वन्दमो मुनिवरं (2) नरोत्तमं॥

रूप्यमप्यसमकं मनोरमं जिह्मकुर्वति जगत्सदेवकं।
ब्रह्म शक्र अकनिष्ठदेवता अग्रतस्तव न ते विराजिते (3)॥

काञ्चनाचल इवासि निर्मलः स्निग्ध केश मृदु दक्षिणोत्थिता।
मेरुराज इव उष्णिषोद्गतो भासते विपुलपुण्यसंभवः॥

---

1) Le mètre du pāda *a* est incorrect.

2) MS. नमोत्तमं.

3) Corr. *virājate* (= *virājante*).

रश्मिकोटिनियुतान्प्रमुञ्चतो राजतोर्ण तव च भ्रुवोस्तटे।
नेत्र उत्पलनिभं मनोरमं येन वीक्षसि जगत्कृपाशयः॥

पूर्णचन्द्र इव निर्मले नभे भासते तव मुखं विनायक।
तृप्यते न हि निरीक्षको जनो वन्दमो सुवदनं नरोत्तमं॥

हंसबर्हिमृगराजविक्रमा मत्तवारणविलम्बगामिनः।
कम्पयन्व्रजसि मेदिनीतलं वन्दमो दशबलं दृढव्रतं॥

दीर्घवृत्तरुचि[3 b]रा कराङ्गुली शुद्ध ताम्र नख जाल चित्रितं।
उत्थित स्पृशति जानुमण्डले वन्दमो कनकवर्णसन्निभं॥

चित्रयन्व्रजसि मेदिनीतलं चक्रजालचितपादविक्रमैः।
पादरश्मिपरिपाचिताश्च्युता देवलोकमुपयान्ति मानवाः॥

धर्मराज धनसम्प्रदायका धर्मदानपति दान्तमानसा।
शासमानु जगधर्मचर्यया धर्मस्वामि प्रणमामि नायकं॥

मैत्र वर्म स्मृति खड्गमुत्तमं शील चापमिषु प्रज्ञुपागतः।
येन क्लेशरिपवो विघातिता जातिमृत्युभवतृष्णवर्धकाः॥

तीर्ण तारयसि सत्वकोटियो मुक्त मोचयसि बन्धनाज्जगत्।
मार्ग दर्शयसि क्षेम निर्ज्वरं येन यान्ति सुगताः शिवं पदं॥

यत्र जातिमरणा न विद्यते विप्रयोग न च दुःखसंभवः।
तं शिवं पदवरं ह्यसंस्कृतं देशितासि करुणामुपेत्य हि॥

स्तुत्य लोकप्रवरं महामुनिं सर्वधर्मवशिपारगं जिनं।
पुण्यमत्र यदुपार्जितं मया तेन बोधिमभिबुध्यतां जगत्॥

अथ खल्वायुष्मान्राष्ट्रपालो भगवन्तमाभिर्गाथाभिरभिष्टुत्य कृताञ्जलिपुट उत्थायासनादेकांस[1]मुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणाम्य भगवन्तमेतदवोचत्॥ पृच्छेयमहं भगवन्तं तथागतमर्हन्तं सम्यक्संबुद्धं कंचिदेव प्रकाशं सचेन्मे भगवानवकाशं कुर्यात्पृष्टः प्रश्नव्याकरणाय॥

एवमुक्ते भगवानायुष्मन्तं राष्ट्रपालमेतदवोचत्॥ पृच्छ त्वं राष्ट्रपाल यद्यदेवाकांक्षस्यहं ते तस्यैव प्रश्नस्य पृष्टस्य व्याकरणेन चित्तमाराधयिष्यामि॥

एवमुक्ते आयुष्मान्राष्ट्रपालो भगवन्तमेतदवोचत्। कतमैर्भगवन्धर्मैः समन्वागतो बोधिसत्त्वो महासत्त्वः सत्त्वधर्मगुणविशेषतामनुप्राप्नोति। अपराधीनज्ञानतां च प्रतिलभते। आशुप्रज्ञतां चानुप्राप्नोति विनिश्चयप्रतिभानतां च प्रतिलभते आलोकतां च प्रतिलभते सर्वज्ञताप्रवेशं सत्त्वपरिपाकं विमतिप्रहाणं काङ्क्षप्रहाणं सर्वज्ञताविनिश्चयं प्रतिलभते। सत्त्वावतारकौशल्यं यथावादितथाकारितां च। भूतसंघापवचनं सत्त्वकौशल्यतां च। बुद्धानुस्मृतिप्रतिलाभं सर्वप्रश्नपरिपृच्छनतां च। सर्वधर्मधारणतां च क्षिप्रं च सर्वज्ञतामनुप्राप्नोति॥ अथ खल्वा[4 a]युष्मान्राष्ट्रपालस्तस्यां वेलायामिमा गाथा अभाषत॥

[2]बोधिसत्त्वचर्या सुनिश्चिता तत्त्वतो भवति यो ऽस्य सभवः।
ज्ञानसागरकथा विनिश्चयं भाषतां मम जिनो नरोत्तमा॥

[3]उत्तप्तचामिकरविग्रहोपमा अग्रसत्त्ववर पुण्यसंचया।
त्वं हि त्राणलयनं परायणा अग्रचर्यममलं वदाद्य मे॥

ज्ञानस्रोतु भवते क्षयः कथं धारणी अमृत बोधि उद्गतं।
प्रज्ञासागर कथं विशुध्यते येन छिन्दति जने ऽस्य संशयं॥

1) MS. *ekāṃçam.*

2) Mètre Rathoddhatā. Dans ce pāda, le mètre demande °चरिया.

3) Corriger pour le mètre: तप्त°.

संसरन्सुबहुकल्पकोटियः खेदबुद्धि न च जातु जायते।
वीक्ष्य लोकमपि दुःखपीडितं तेषमर्थकुशलं निषेवते॥

क्षेत्रशुद्धिपरिवारसंपदं आयुरग्र्यमथ क्षेत्रसंपदं।
सत्त्वकारणकथा निरुत्तरा बोधिचर्यममलां प्रकाशय॥

मारभञ्जन कुदृष्टिशोधना तृष्णाशोषण विमुक्तिस्पर्शना।
धर्मनेत्रि रयिन प्रमुञ्चत सत्त्वरत्न निगदोत्तमां चरिं॥

रूप भोगप्रतिभानसंपदं स्निग्धवाक्पर्षद[1]श्च तोषणी।
मेघवत्सुगत तर्पयञ्जगत् देशयस्यपि च बुद्धगोचरं[2]॥

मञ्जुघोष कलविंकसुस्वरा ब्रह्मघोष कुमतिप्रणाशना[3]।
धर्मकाम पर्षत्समागता तर्पयामृतरसेन तां प्रभो॥

अस्ति छन्द प्रवराग्रबोधये धर्म छन्द विहितो न युज्यते।
देशनासमय एष नायका काल एष वररत्नश्रावणे॥

बोधिकाङ्क्ष मम विद्यते मुने आशयं मम जिन प्रजानसे।
प्रार्थयामि न जिनस्य हेठनां[4] साधु उत्तमचरिं प्रकाशय॥

एवमुक्ते भगवानायुष्मन्तं राष्ट्रपालमेतदवोचत्। साधु साधु राष्ट्रपाल साधु खलु पुनस्त्वं

1) Corriger pour le mètre: परिषद°. De même au vers suivant.

2) MS. गोचर.

3) MS. °नासना.

4) PW. ne donne que le composé *viheṭhana*, «offense».

राष्ट्रपाल यस्त्वं तथागतमेतमर्थं परिप्रष्टव्यं मन्यसे। बहुजनहिताय त्वं राष्ट्रपाल प्रतिपन्नो बहुजनसुखायार्थाय हिताय देवानां च मनुष्याणां चैतर्हि चानागतानां च बोधिसत्वानां महासत्वानां संपरिग्रहाय। तेन हि राष्ट्रपाल शृणु साधु च सुष्ठु च मनसि कुरु। भाषिष्ये ॥ साधु भगवन्नित्यायुष्मान्राष्ट्रपालो भगवतः प्रत्यश्रौषीत्। भगवांस्तस्यैतदवोचत् ॥

चतुर्भी राष्ट्रपाल धर्मैः समन्वागतो बोधिसत्वो महासत्व एतां परिशुद्धिं प्रतिलभते। कतमैश्चतुर्भिर्यदुत तारायाध्याशयप्रतिपत्त्या सर्वसत्वसमचित्ततया शून्यताभावनतया यथावादितथाकारितया। एभी राष्ट्रपाल चतुर्भिर्धर्मैः समन्वागतो बोधिसत्वो महासत्व एतां परिशुद्धिं प्रतिलभते। इयमत्र धर्मता। तत्रे[4 b]दमुच्यते ॥

(1)आशयेन हि सदाभियुक्तका बोधिमार्ग अविवर्त्यमानसाः(2)।
नो च शाठ्य न खिलं न मायता तेषु विद्यति अनन्तज्ञानिनाम् ॥

दृष्ट्व सत्व दुखितानतायकान् जातिव्याधिजरमृत्युमर्दितान्।
(3)तारणार्थ भवतो जगत् धर्मनाव समुदानयन्ति ते ॥

सर्वसत्वसमचित्तसूरता एकपुत्रकवदीक्षते जगत्।
सर्वमेतदपि मोचयाम्यहम् एवमाशय तथाग्रपुद्गलाः ॥

शून्यतासु सततं गतिं गत नैव चात्म न च सत्व विद्यते।
स्वप्नमायसदृशं हि संस्कृतम् अत्र बाल अबुधो विमोहिता ॥

---

1) Mètre: Rathoddhatā.

2) MS. मानसा.

3) Pāda incomplet.

वाचया यथ वदन्ति ते बुधास् तत्र चैव प्रतिपत्तिया स्थिताः(1)।
दान्त शान्त सद दोषवर्जिता बोधिमार्गनिरता जिनात्मजाः ॥

चत्वार इमे राष्ट्रपाल बोधिसत्वानामाश्वासप्रतिलाभा धर्माः। कतमे चत्वारः। धारणीप्रतिलाभः कल्याणमित्रप्रतिलाभः गम्भीरधर्मक्षान्तिप्रतिलाभः परिशुद्धशीलसमाचारता। इमे राष्ट्रपाल चत्वारो बोधिसत्वानामाश्वासप्रतिलाभा धर्माः। इयमत्र धर्मता। तत्रेदमुच्यते।

(2)लाभिनो भवन्ति धारणीषु ते सदा महायशा
धारयन्ति येन धर्म श्रेष्ठ सर्वबुद्धभाषितम्।
न च प्रणाशयन्ति जातु भूयु वर्धते सति
असंगमेव तेषु ज्ञान सर्वधर्मपारगाः ॥

कल्याणमित्रमाप्नुवन्ति बोधिअङ्गवर्धका
देशयन्ति श्रेष्ठ मार्ग तस्य येन यान्ति नायकाः।
न कचिच्च ते भवन्ति पापमित्रसेवका
दूरतो विवर्जयन्ति ते अग्निवच्च दाहनात्मकान्(3) ॥

गम्भीर धर्म श्रुत्व धीर शून्यतोपसंहितं
न चात्मसत्वजीवदृष्टि तेषु भोन्ति सर्वशः।
अच्छिद्रशील ते भवन्ति शान्तदान्तमानसा
अनुत्तरे च बुद्धशीलि सत्व तां नियोजयेत् ॥

चत्वार इमे राष्ट्रपाल बोधिसत्वानां संसारप्राप्तानां प्रीतिकरणा धर्माः। कतमे चत्वारः।

---

1) MS. स्थिता.

2) Mètre: Pañcacāmara irrégulier.

3) MS. °काः.

बुद्धदर्शनं राष्ट्रपाल बोधिसत्त्वानां प्रीतिकरणो धर्मः । अनुलोमधर्मश्रवणं राष्ट्रपाल बोधिसत्त्वानां प्रीतिकरणो धर्मः । सर्वस्वपरित्यागः । अनुपलम्भधर्मक्षान्तिः । इमे राष्ट्रपाल बोधिसत्त्वानां संसारप्राप्तानां चत्वारः प्रीतिकरणा धर्माः । इयमत्र धर्मता । तत्रेदमुच्यते ।

(1) पश्यन्ति ते नरोत्तमं संबुद्धं सर्वज्ञोतिषु
सर्वलोक भासयन्त तेजसा समन्ततः ।
पूजयंस्तथा नरेन्द्र[5 a]राज प्रेमगौरवस्थिता
वराग्रबोधिमेषमाण सत्त्वमोक्षकारणात् ॥

शृणोति धर्म नायकान शान्तमानुलोमिकम्
(2) आशयेन श्रुत्व धीर योनिशः प्रयुज्यते ।
अनोपलम्भधर्म श्रुत्व काङ्क्ष नास्य जायते
निःसत्त्व एति सत्त्वधर्म नात्र आत्म विद्यते ॥

सर्वस्वपरित्यागि सो भवेत नित्यमग्रहो
प्रहृष्टचित्त दृष्ट्व चैव याचकमुपागतम् ।
ग्राम राष्ट्र मेदिनीं च पुत्र दार जीवितं
संत्यजन्ति सर्व नास्य जायते च चित्त इञ्जना(3) ॥

चतुर्षु राष्ट्रपाल धर्मेषु बोधिसत्त्वेनानपेक्षेण भवितव्यं । कतमेषु चतुर्षु । गृह(4)वासाद्राष्ट्रपाल बोधिसत्त्वेनानपेक्षेण भवितव्यं । प्रव्रजित्वा राष्ट्रपाल बोधिसत्त्वेन लाभसत्कारादनपेक्षेण भवितव्यं । कुलसंस्तवाद्राष्ट्रपाल बोधिसत्त्वेनानपेक्षेण भवितव्यं । कायजीविताद्राष्ट्रपाल बोधिसत्त्वेनानपेक्षेण भवितव्यं । एषु चतुर्षु राष्ट्रपाल धर्मेषु बोधिसत्त्वेनानपेक्षेण भवितव्यं । इयमत्र धर्मता । तत्रेदमुच्यते ॥

1) Mètre: Pañcacāmara irrégulier.
2) MS. आश्रयेण.
3) MS. °ना क्वचित्.
4) MS. गृहा°.

(1) त्यक्त्वा गेहमनन्तदोषगहनं चिन्तानपेक्षा सदा
ते ऽरण्ये रतिमाप्नुवन्ति गुणिनः शान्तेन्द्रियाः सूरताः ।
न स्त्रीसंस्तवु नैव चापि पुरुषैस्तेषां क्वचिद्विद्यते
एकाकी विहरन्ति खड्गविमलाः शुद्धाशया निर्मलाः ॥

लाभैर्नापि च तेषु हर्षितमनो लोपन्त्यलाभैर्न च
अल्पेच्छा इतरेतरैरभिरता मायाकुहावर्जिताः ।
सत्त्वार्थाय च वीर्ययुक्तमनसो दाने दमे ऽवस्थिता
ध्याने वीर्यगुणे च पारमिगताः संबुद्धज्ञानार्थिनः ॥

काये चाप्यनपेक्ष्य जीवित तथा त्यक्त्वा प्रियान्बान्धवान्
युज्यन्ते सद बोधिमार्ग सुदृढा वज्रोपमाध्याशयाः ।
(2) कायश्छिद्यति खण्डशश्च न भवेत्तेषां च चित्तेञ्जना
भूयो वीर्यमिहारभन्ति सुदृढं सर्वज्ञताकाङ्क्षिणः ॥

चत्वार इमे राष्ट्रपाल बोधिसत्त्वानामननुतापकरणा धर्माः । कतमे चत्वारः । शीलाखण्डनता राष्ट्रपाल बोधिसत्त्वानामननुतापकरणो धर्मः । अरण्यवासा(3)कुत्स्यजननता । चतुर्णामार्यवंशानामनुवर्तनता । बाहुश्रुत्यप्रतिलाभो राष्ट्रपाल बोधिसत्त्वानामननुतापकरणो

1) Mètre: Çārdūlavikrīḍita.
2) MS. काये . . . भवेतेषां.
3) MS. °वासानुत्स्य°

धर्मः । इमे राष्ट्रपाल चत्वारो बोधिसत्त्वानामननुतापकरणा धर्माः । इयमत्र धर्मता । तत्रेदमुच्यते ॥

[1] रक्षन्ति शीलममलं मणिरत्नतुल्यं [5b] न च तेषु भोति अनुशील[2] सुसंयतो वा ।
तत्रैव शीलि सद सत्त्व नियोजयन्ति आकाङ्क्षमाणामिममुत्तमबुद्धशीलम् ॥

शून्ये च ते हि निवसन्ति शुभे अरण्ये नैवात्मसंज्ञ भवते ऽपि न जीवसंज्ञा ।
तृणकाष्ठकोथ[3]सम पश्यति सत्त्वरूपं स्त्री नेह नास्ति च पुमान्न च आत्मनीयम् ॥

चतुरार्यवंशनिरता अकुहा अशाठ्या अध्याशयेन च प्रयुज्यति सो ऽप्रमत्तः ।
कुर्वन्ति च श्रुतिगुणेषु सदाभियोगं संप्रार्थयन्सुगतज्ञानमहानुभावम् ॥

भवचारके जगदवेद्य इदं ह्यनाथं जातीजरामरणशोकहतं रुजार्तम्[4] ।
समुदानयित्व प्रवरां शिवधर्मनावं स तारयन्ति जनतां भवसागरौघात् ॥

न त्राणमन्यशरणं हि परायणं वा लोकस्य संस्कृतगतौ भ्रमतो ऽस्ति कश्चित् ।
मयि सर्व एव परिमोचयितव्य सत्त्वा इत्यर्थमेव प्रणिधिर्मम अग्रबोधौ ॥

चतस्र इमा राष्ट्रपाल आजानेयगतयो बोधिसत्त्वेनानुगन्तव्याः । कतमाश्चतस्रः । सुगतिप्रतिलाभः स च बुद्धोत्पादसमवधानतया । गुरुशुश्रूषणा सा च निरामिषसेवनतया । प्रान्तशय्यासनाभिरतिः सा च लाभसत्कारानपेक्षतया । प्रतिभानप्रतिलाभः स च गम्भीरधर्मक्षान्तिसमन्वागततया । इमा राष्ट्रपाल चतस्र आजानेयगतयो ऽनुगन्तव्याः । इयमत्र धर्मता । तत्रेदमुच्यते ॥

1) Mètre: Vasantatilakā.

2) MS. अद्दशील.

3) MS. कुथ.

4) MS. रुजातं.

[1] वनकन्दरेषु सततं निवसन्ति धीरा लाभेन ते सद अनर्थिक भोन्ति नित्यम् ।
प्रतिभानवान्सद भवन्ति असंगबुद्धी गम्भीरधर्मकुशला विगतप्रपञ्चाः ॥

शुश्रूषकाः[2] सद भवन्ति गुरुषु नित्यं यथ ते वदन्ति हि तथैव च ते प्रयुक्ताः[3] ।
आरागयन्ति सुगतान्बहवो ऽप्रमेयान् कुर्वन्ति पूज विपुलां जिनज्ञानहेतोः ॥

श्रेष्ठा गतिर्भवति चापि महाशयानां देवेषु चैव मनुजेषु च मूर्ध्न प्राप्ताः ।
संबोधिमार्ग सद सत्त्व समादयन्ति[4] संयोजयन्ति कुशलेषु दशस्वथापि ॥

श्रुत्वा च बुद्धगुण ते च भवन्ति तुष्टा आसन्न ते तु न चिराद्भविता हि मह्यम् ।
संबुध्यते ऽपि च शिवां विरजाग्रबोधिं मोचिष्य सत्त्वनियुतानि अनन्तदुःखात् ॥

चत्वार इमे राष्ट्रपाल बोधिसत्त्वानां बोधिचर्यापरिशोधका धर्माः । कतमे चत्वारः । अप्रतिहतविज्ञानाविरहितस्य बोधिसत्त्वचर्या । कुहनलेपन[5]निष्पेषणपरिवर्जितस्यारण्यवासः । सर्वस्वपरित्यागिनो विपाकाप्रतिकाङ्क्षता [6a] रात्रिंदिवं धर्मकामता । धर्मभाणकानां च स्खलितागवेषणता । इमे राष्ट्रपाल बोधिसत्त्वानां चत्वारो बोधिसत्त्वचर्यापरिशोधका धर्माः । अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

[6] न खिल मल न चापि रोषचित्तं न च पुनरेषति कस्यचित्स दोषम् ।
अशठ अकुह निष्प्रपञ्चचित्तो भवति अनुत्तरबोधिमीप्समानः ॥

1) Mètre: Vasantatilakā.

2) MS. शुश्रुषका.

3) MS. °युक्ता.

4) Pb. = *samādāpayanti*, «ils excitent»

5) Les dictionnaires ne fournissent pas, pour les mots *lepana* et *niṣpeṣaṇa*, de sens qui convienne ici. Les racines *lip* et *piṣ* signifiant resp. *serane* et *saṃcūrṇane*, il semble qu'on pourrait rendre *lepana* par «flatterie» et *niṣpeṣaṇa* par «brutalité».

6) Mètre: Puṣpitāgrā.

गृहमतिविषमं च शोकमूलं कुजनसमागमयोनिमस्य[1] दूरम्।
त्यजति तदनपेक्ष्य प्रव्रजित्वा गिरिगहने विचरन्ति मोक्षकामाः॥

अरण्यविविधप्रान्त सेवमानो भवति अनिश्रित सर्वज्ञात्रलाभे।
काय अपि च जीविते ऽनपेक्षो विहरति सिंह इवोत्त्रसञ्जितारिं॥

भवति च इतरेतरेण तुष्टः शकुनिसमः सद संचयं विहाय।
न च भवति निकेतु सर्वलोके ज्ञान गवेषति नित्य बोधिमार्गे॥

एक विहरति यथैव खड्गो न च पुनरुत्त्रसते यथैव सिंहः।
न च भुवि विश्वसते मृगेव त्रस्तो न च पनुरुन्नमते स पङ्गनेन॥

जगदिदमभिवीक्ष्य च प्रपाते प्रपतितमुद्यमते प्रमोक्षहेतोः।
अहमपि जगतो ऽस्य त्राणभूतो यदि कुशलेषु चरेयमप्रमत्तः॥

सुमधुरवचनः स्मिताभिलाषी अकलुषचित्त प्रियाप्रियेषु नित्यम्।
विहरति न च सज्जते ऽनिलो वा नरवरचर्यमिमामभीप्समानः॥

शून्यतमधिमुक्तमानिमित्तं[2] विचरति संस्कृत सर्वमायभूतम्।
शमदमनिरतो विशालबुद्धिः अमृतरसेन च सर्वदा स तुष्टः॥

[3]प्रतिवदसि यथा च बोधिमार्गे स तु परिशोधयते सदाशयं च।
धारणीप्रतिलाभमेषमाणः सहति च दुःख सतां गुणाभिकाङ्क्षी॥

1) MS. योनिसस्य. *asya* est l'absolutif de *as* 2. Cf. infra *tyajya*, *stuya* = *tyaktvā*, *stutvā*.

2) Corr. *adhimukta ānimittām* = animittāṃ.

3) Corr. *pratidivasapathā* (?).

इमु चरिमभिवीक्ष्य बोधिसत्वो यो भवते ऽर्थिकु सो भवेत तुष्टः।
य इह भवति बोधये असक्तो जनयति दोषशतानि सो ऽल्पबुद्धिः॥

चत्वार इमे राष्ट्रपाल बोधिसत्वानां प्रपाताः। कतमे चत्वारः। अगौरवता राष्ट्रपाल बोधिसत्वानां प्रपातः। अकृतज्ञताशाठ्यसेवनता राष्ट्रपाल बोधिसत्वानां प्रपातः। लाभसत्काराध्यवसानं राष्ट्रपाल बोधिसत्वानां प्रपातः। कुहनलपनतया लाभसत्कारनिष्पादनं राष्ट्रपाल बोधिसत्वानां प्रपातः। इमे राष्ट्रपाल बोधिसत्वानां चत्वारः प्रपाताः॥ अथ खलु भगवांस्तस्यां वेलायामि[6 b]मा गाथा अभाषत॥

[1]नित्यमगौरव ते हि भवन्ति आर्यगुरुष्वपि मातृपितृषु।
अकृतज्ञशठाश्च भवन्ति नित्यमसंयतचारिण मूढाः॥

अध्यवसानपराः सद लाभे ते कुहशाठ्यप्रयोगरताश्च।
कश्चिदपीह समो मम नास्ति वक्ष्यति शीलगुणेषु कथंचित्॥

ते च परस्परमेव च द्विष्टा छिद्रगवेषणनित्यप्रयुक्ताः।
कृषिकर्मवणिज्यरताश्च श्रवणा[2] हि सुदूरत तेषाम्॥

एवमसंयत पश्चिमकाले भिन्नव्र शीलगुणेषु सुदूरे।
ते ऽन्तर ह्रापयिष्यन्ति मधर्म[3] भण्डनविग्रहईर्ष्यवशेन॥

बोधिपथादपि नित्य सुदूरे आर्यधनादपि ते च सुदूरे।
मोक्षपथं च विहाय प्रणीतं पञ्चसु ते गतिषु भ्रमिष्यन्ति॥

1) Mètre: Dodhaka.

2) D'après les 2 versions chinoises, *çravaṇā* = *çramaṇā*. (Cf. PW. v° çravaṇa 4.)

3) MS. मु°. La leçon *madharmaṃ* = *maddharmaṃ* est garantie par le chinois.

चत्वार इमे राष्टपाल बोधिसत्त्वानां बोधिपरिपन्थकारका धर्माः। कतमे चत्वारः। अश्रद्दधानता राष्ट्रपाल बोधिसत्त्वानां बोधिपरिपन्थकारको धर्मः। कौशीद्यं राष्ट्रपाल बोधिसत्त्वानां बोधिपरिपन्थकारको धर्मः। मानो राष्ट्रपाल बोधिसत्त्वानां बोधिपरिपन्थकारको धर्मः। परपूज्येर्ष्यामात्सर्यचित्तं राष्ट्रपाल बोधिसत्त्वानां बोधिपरिपन्थकारको धर्मः। इमे राष्ट्रपाल बोधिसत्त्वानां चत्वारो बोधिपरिपन्थकारका धर्माः॥ अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

(1) अश्रद्धाः कुशीदाः सद मूढचित्ता अभिमानिनस्ते ऽपि सदा च क्रोधनाः।
क्षमिणाश्च दृष्ट्वा सद भिक्षु युक्तं दास्यन्ति दण्डं व्रजतो विहारात्॥

परस्य पूजार्थमिहेर्ष्य जाता अवस्थानु चित्तस्य च तेषु नास्ति।
अवतारप्रेक्षी स्खलितां गवेषी को ऽस्यापराधो ऽस्तिह चोदयिष्ये॥

दूरे इतस्ते मम शासनस्य गुणद्वेषिणस्ते हि अपायनिम्नाः।
त्यक्त्वा जिनस्यापि च शासनं ते यास्यन्त्यपायं ज्वलितं प्रचण्डम्॥

श्रुत्वा च तेषामिह पापचर्याम् अधर्मयुक्तां च गतिं सुदारुणाम्।
युज्यध्व नित्यं सद बोधिमार्गे मा तप्स्यथा दुर्गतिषूपपन्नाः॥

बहुकल्पकोटीभि कदाचि बुद्धो उत्पद्यते लोकहितो महर्षिः।
लब्धो ऽधुना स प्रवरः क्षणो ऽद्य त्यज प्रमादं यदि मोक्षकामः॥

चत्वार इमे राष्ट्रपाल पुद्गला बोधिसत्त्वेन न सेवितव्याः। [7a] कतमे चत्वारः। पापमित्रं राष्ट्रपाल पुद्गलो बोधिसत्त्वेन न सेवितव्यः। उपलम्भदृष्टिको राष्ट्रपाल बोधिसत्त्वेन न सेवि-

1) Mètre: Indravajrā, Upendravajrā, Upajāti.

तव्यः। सद्धर्मप्रतिक्षेपकः पुद्गलो राष्ट्रपाल बोधिसत्त्वेन न सेवितव्यः। आमिषलोलुपः पुंगलो राष्ट्रपाल बोधिसत्त्वेन न सेवितव्यः। इमे राष्ट्रपाल चत्वारः पुंगला बोधिसत्त्वेन न सेवितव्याः। अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

ये पापमित्राणि विवर्जयन्ति कल्याणमित्राणि सदा भजन्ति।
वर्धन्ति ते बोधिपथेषु नित्यं यथ शुक्लपक्षे दिवि चन्द्रमण्डलम्॥

उपलम्भदृष्ट्या च सदा निविष्टा आत्मे निविष्टास्तथ जीवपोषे।
विषकुम्भवत्ते सद वर्जयन्ति ये बुद्धज्ञानेन भवन्ति अर्थिकाः॥

क्षिपन्ति ये धर्म नरोत्तमानां शान्तं विरागममृतानुकूलम्।
तान्वर्जयेन्मीढघतां यथैव य इच्छते बुध्यितुमग्रबोधिम्॥

अप्योषिताआमिष पात्रचीवरे कुलसंस्तवे चैव सदाभियुक्ताः।
कुर्वीत सार्धं न हि तेषु संस्तवं तान्वर्जयेदग्निखधां यथैव॥

यस्येप्सितं धर्षयितुं हि मारं प्रवर्तितुं चक्रवरं ह्यनुत्तरम्।
सत्त्वार्थमेवं विपुलं च कर्तुं वर्ज्याश्च तेनापि च पापमित्राः॥

विवर्जयित्वा च प्रियाप्रियाणि लाभं यशो भण्डन मानमीर्ष्याम्।
एषेत नित्यं सद बुद्धज्ञानं य इच्छते बुध्यितुमग्रबोधिम्॥

चत्वार इमे राष्ट्रपाल बोधिसत्त्वानां दुःखविपाका धर्माः। कतमे चत्वारः। ज्ञानेनाभिमन्यनता राष्ट्रपाल बोधिसत्त्वानां दुःखविपाको धर्मः। ईर्ष्यामात्सर्यचित्तं राष्ट्रपाल बोधिसत्त्वानां दुःखविपाको धर्मः। अनधिमुक्ती राष्ट्रपाल बोधिसत्त्वानां दुःखविपाको धर्मः। अपरिशुद्धज्ञानक्षान्तिसंभोगपर्येष्टी राष्ट्रपाल बोधिसत्त्वानां दुःखविपाको धर्मः। इमे राष्ट्रपाल बोधिसत्त्वानां दुःखविपाका धर्माः। अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

धर्मधरा[1] भुवि ये तु भवन्ति पूजित सर्वजगेषु भवन्ति ।
अवमन्यति तानिअाज्ञः[2] (?) तेन स विन्दति दुःखमनन्तम् ॥

विषमेण स देशति भोगान् छन्दरुचिः सद ज्ञानि अशुद्धे ।
मानोन्नत यश्च हि नित्यं नो नमते गुरुआर्यजनेषु ॥

अधिमुक्ति न वि[7 b]द्यति बुद्धे धर्मगणे च न तस्यधिमुक्तिः ।
शितधुतेषु[3] न तस्यधिमुक्तिः पापमतेस्त्रिरपायमुखस्य ॥

स इतश्च्युतो हि मनुजेषु कर्मवशादबुधो हि विमूढः ।
नरकेष्वथ तिर्यगतिषु प्रेतगतिषु च विन्दति दुःखम् ॥

यस्य मतिर्भुवि लोकप्रदीपो दुःखतपान्तकरो नरवीरः ।
तेन अपायपथं प्रविहाय बोधिपथः सततं हि निषेव्यः ॥

चत्वारीमानि राष्ट्रपाल बोधिसत्त्वानां बन्धनानि । कतमानि चत्वारि । परावमन्यनता[4] बोधिसत्त्वानां बन्धनम् । लौकिकेनोपायेन भावनताप्रयोगनिमित्तसंज्ञा बोधिसत्त्वानां बन्धनम् । अनिगृहीतचित्तस्य ज्ञानविरहितस्य प्रमादसेवनता राष्ट्रपाल बोधिसत्त्वस्य बन्धनम् । प्रतिबद्धचित्तस्य कुलसंस्तवो राष्ट्रपाल बोधिसत्त्वस्य बन्धनम् । इमानि राष्ट्रपाल बोधिसत्त्वानां चत्वारि बन्धनानि । अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

अवमन्यति नित्य परस्य भावयते सदा लौकिकध्यानम् ।
बध्यति तेभि स दृष्टिशतेभिः पङ्कि गजो यथ दुर्बलकायः ॥

1) Mètre: Dodhaka.
2) Corr. *tān iha ajñaḥ?*
3) *çikṣadhuteṣu* = *çikṣādhūteṣu.*
4) MS. परातिमन्यनता.

कुलसंस्तवबन्धनयुक्तो यस्तु प्रमत्त सदा अहचित्तः ।
ज्ञानविवर्जित मूढमतिश्च बध्यति एभि अयुक्तचारिभिः ॥

यो ह्यत इच्छति दुःखभयेभ्यो जातिजरामरणादिविमोक्षम् ।
सो अवमन्यनमन्यन त्यक्त्वा युज्यति बोधिपथे सततं च ॥

दुःखमनन्त सहित्वमशेषं सर्वसुखादनपेति भवित्वा ।
त्यक्त प्रियाप्रियज्ञात्रमशेषं बुद्ध भवन्ति विकल्मषधीराः ॥

षट्सु प्रयुज्यत पारमितासु भूमिगुणेषु बलेन्द्रियज्ञाने ।
सर्वगुणैश्च सदा समुपेता बुद्ध भवेज्जरपञ्जरमुक्तः ॥

कल्प अचिन्तिय पूर्व चरन्तः सत्त्वहिताय चरन्वरबोधौ ।
दानदमे नियमे ऽपि च नित्यं सुस्थित आसो त्यजित्व च ज्ञातीन् ॥

प्रान्तवने सद नित्य रतो ऽहं शोधित आशयु बोधिनिदानम् ।
न च संसृतु वीर्य कदाचिदेषत ज्ञान महापुरुषाणाम् ॥

भवचारके जगति दृष्ट्वा पञ्चगतिभ्रमथामितसत्त्वान् ।
कृत्व कृपां विपुलामिह पूर्वे आर्जित बोधि बलाज्जगदर्थे ॥

दुहितृस्वसुताः[1] प्रियभार्यास् त्यक्त पुरा धनधान्य प्रभूताः ।
जीवित इष्ट [8 a] मही सुसमृद्धा एषत बोधिवरां बहुकल्पान् ॥

फलपुष्पजलाढ्य सुरम्य आसि वने मुनि क्षान्तिरतो ऽहम् ।
छिन्न करौ चरणौ कलिराज्ञा नैव मनो ऽपि तदा मम दुष्टम् ॥

1) MS. सुता.

वनकन्दरि श्यामकु नाम आसि मुनिर्भरतो गुरु जीर्णो।
दष्ट्वाणाहतन नृपेण नैव मनः परिदूषितमासीत्॥

शैलतटादनपेक्ष्य शरीरं प्रोत्सृजतश्च सुभाषितहेतोः।
काये न च मे न च जीवे बोधिनिमित्तमवेक्ष्य बभूव॥

व्याघ्रिसुतानपि जीवितहेतोस् त्यज्य तनुं परितर्पित व्याघ्री।
गगने ऽभ्यनदन्सुरसंघाः साधु महापुरुष स्थिरवीर्य॥

अतिदानरतश्च यदासीत् माणव पूर्वभवेषु चरंश्च।
शोषितु रत्ननिदानसमुद्रः प्राप्य मणिं सुखिताः कृत सत्वाः॥

सुतसोम महीपतिरासीत् विश्रुतकीर्त्ति चरंश्च यदाहम्।
वध्यगतं कृतकृत्यनयैर्मे राजशतं परिमोचितमाशु॥

दुःखित वीक्ष्य नरं च दरिद्रं त्यक्त मया प्रियमेव शरीरम्।
प्राप्य धनं स कृतश्च मयाढ्यः सर्वददेन नृपेण सता मे॥

शरणागत वीक्ष्य कपोतं स्वं पिशितं विनिकृत्य शरीरात्।
दत्तमपि स्वतनुर्न भयार्त्तम् त्यक्त इहापि नृपेण सता मे॥

कृत्स्नमुपार्जितमाप्य भिषग्भिर्भैषज्यमप्रतिमं मम पूर्वम्।
जीवित त्यज्य परस्य ददौ तं केसरिराज बभूव यदाहम्॥

चरता च पुरा जगदर्थे मद्रि पतिव्रत त्यक्त सपुत्रा।
दुहिताप्यनपेक्ष्यदसंघ आसि नृपात्मजो यद सुदंष्ट्रः॥

वर्षसहस्र मया परिपूर्णा मर्षित दुःकराश्चतुरशीति।
उत्तप्तवीर्यु यद आसीत् अर्थधनाश्रियो ऽपि च पुरा मे॥

जिनधातुस्तूपपुरतो मे ज्वलित आश्रयः परमभक्त्या।
पूजा कृता दशबलानाम् आसि नृपात्मजो विमलतेजाः॥

रौद्रत एव च रुषित्वा याचितवान् स चापि मम शीर्षम्।
दत्तं निकृत्य च मया तद्द राज यदा च चन्द्रप्रभ आसीत्॥

सर्वत्र ग्रामनगरेषु वीथिमुखेषु भैषज्यमुदारम्।
सत्वार्थ स्थापित मया ते पुण्यसमो वभूव च यदाहम्॥

स्त्रीणां सहस्रमभिरूपाः काञ्चनमुक्तिभूषितशरीराः।
त्यक्ता पूर्व[1]भवेषु चरता मे आसि यदा शुभो नृपति पूर्वे॥

पुष्पैर्वरैरपि च गन्धैः काञ्चनमुक्तिका[2]प्रवरश्रीमान्।
त्यक्तश्च मे मकुट पूर्व आसि नृपो यदा रतनचूडः॥

मृदुतूलपिचू[8 b]पमसूक्ष्मौ कोमलपद्म[3]पत्रसुकुमारौ।
त्यक्तौ करौ सचरणौ मे पूर्व नृपेण धृतिमता च॥

विनिगृह्य राक्षसिशतानि निर्घृणदारुणप्रवलचण्डा।
कृत मानुषा बदरद्वीपे सिंहल सार्थवाह यद आसीत्॥

कामेषु मूर्च्छितमना मे बालि स राक्षसी प्रमदसंज्ञा।
पञ्चशतानि वणिजानां मोक्षित ते यदाभवे सुनेत्रः॥

चत्वारि कोटि प्रमदानाम् अप्सरतुल्यरूपिणां विहाय।
प्रव्रज्य निर्गतु जिनस्य शासने पुण्यरश्मि यद आसीत्॥

---

1) पूर्व est à supprimer, metri causa.
2) MS. मुक्तिभूषितं.
3) MS. °पत्तौ.

मयि त्यक्तमङ्गुलि उदारा सत्त्वहितार्थमेव चरता मे ।
जालार्चिता विमलशुद्धा काञ्चनवर्णा पार्थिव यदासीत्[1] ॥

शुभ नीलपद्मसमवर्णा नेत्र मनोरमा हृदयकान्ता ।
त्यक्ता मया च जगदर्थे उत्पलनेत्र पार्थिव यदासीत् ॥

प्रियविप्रयोगहृत दृष्ट्वा स्त्री च प्रणष्टरूपमतिवेषा[2] ।
परिमोचिता करुणाया मे केशव वैद्यराज यद आसीत् ॥

व्याध्यातुरं च नरमीक्ष्य स्वं रुधिरं प्रदत्तमपि मेऽभूत् ।
निर्व्याधितः स च कृतो मे प्राग्भव सर्वदर्शि यदभूवम् ॥

छित्वा स्वमस्थि च शरीराद् व्याधिकृशस्य मज्ज मया दत्तम् ।
न च सत्त्व त्यक्त मम जातु आसि नृपो यदा कुसुम नाम ॥

सर्व स्वकोशमपि त्यक्त जीवित त्यक्त मे प्रिय मनापम् ।
नरु मोक्षितो व्यसनप्राप्त आसि नृपो ऽर्थसिद्धि यद पूर्वम् ॥

चक्राङ्कितं कमलतुल्यं पाणियुग प्रदत्तमनपेक्षम् ।
नृप आशुकेतु यद आसीद् बोधिमभीप्समान जगदर्थे ॥

नृप सर्वदर्शि यद आसीत् कारुणिको जनार्थहितकामः ।
त्यक्ता मया चतुरो ऽपि च द्वीपाः स्फीतनरैर्वरनरीशतैश्च ॥

मृदु कोमलं विमलगौरं ऊरु ताच्छ्व दृष्ट[3]मुदिताया ।
दत्तं स्वमांस रुधिरं मे ज्ञानवती यदासि नृपपुत्री ॥

1) MS यद आसीत्. 2) MS. वेसा. 3) Corr. *hṛṣṭa*°.

कनकाभपीनसुकुमारं त्यक्त स्तनद्वयं हृदयकान्तम् ।
स्त्री प्रेक्ष्य मे क्षुधतृषार्त सारूप्यवतीति वनिता यदाभूत् ॥

वरभूषणानपि सुरम्यान् रत्नमनेकवस्त्ररथयानान् ।
संत्यक्त दुस्त्यजमनेकं विश्रुतश्रीनृपेण च मयाभूत् ॥

राज्ञः सुतो तु विकृतज्ञम् तारित सागराद्यदकृतज्ञः ।
रत्नार्थ नेत्र मम तेन उद्धृत नैव मे रुषित चित्तम् ॥

माभूत्पिपीलिकवधो मे त्यक्त वराश्रयो ऽपि चनपेक्ष्य ।
न च चित्त कम्पित तदा मे पूर्वभवेषु गोध यद आसीत् ॥

उपस्थानगौरवरतो ऽहं वृद्धचरीषु नित्य रत आसीत् ।
न च मा[9a]नवानपि च स्तब्ध आसि कपिञ्जलो विचरमाणः ॥

शरणागतस्य च मयार्थे त्यक्त समुच्छ्रयः कृप जनित्वा ।
न च त्यक्त वानरगतेन व्याधनरः शराभिनिहतेन ॥

गजवशगतेन शोषितो मे तनुरपि वृद्धगुरुं जगत्स्मरित्वा ।
सुरुचिरमशनं मया न भुक्तं मोक्षित आत्म गजा यदा तदासीत् ॥

ऋक्षपतिरभूव शैलदुर्गे हिमहत सप्तदिनानि रक्षितो मे ।
पुरुष वधकु तेन म प्रयुक्तो न च प्रतिघात कृतश्च मे तदास्मिन् ॥

[1]आसि गजो हिमकुन्दनिकाशो बोधिवराश्रित बुद्धगुणार्थी ।
स विषेण शरेण च विद्धो दंष्ट्रवरांस्त्यजमान न द्विष्टः ॥

1) Mètre: **Dodhaka**.

वनगोचरि खण्डकद्वीपे तित्तिरिपोतक मैत्रविहारी।
सह दर्शनेन समितो ऽग्निं देवगणा कुसुमानि क्षिपन्ति॥

गङ्गतरङ्गजलैर्ह्रियमाणाः तारित मे यद आसि मृगत्वे।
वधका मम तेनुपनीता नैव मनो मम तत्र प्रदुष्टम्॥

तारित पञ्चशतं वणिजानां सागरमध्यगताश्च अनाथाः।
तैश्च हतः क्षुधितैश्च तदाहं कच्छपयोनिगतो ऽपि च मैत्रः॥

बोधिचरिं चरमाणाकु पूर्व मत्स्य बभूव यदा जलचारी।
त्यक्त मयाश्रय सत्वहिताय भक्षित प्राणिसहस्रशतेभिः॥

व्याधिशताभिहतं जगदीक्ष्य भैषजभूतसमुच्छ्रय कृत्वा।
सत्व कृताः सुखिता निरुजाश्च प्राणकु सौम्य तदा च यदासीत्॥

सिंह बभूव यदा मृगराजा स्थामबलान्वित कारुणिकश्च।
विद्ध शरेण न दूषित चित्तं मैत्रि तदा वधके ऽपि तदा मे॥

शङ्खतुषारनिभो हयराजा आसि पुरा च समुद्रतटे ऽहम्।
राक्षसिमध्यगता वणिजो मे तारित कृत्व कृपां करुणां च॥

बोधिचरिं चरमाण जनार्थे आसि कुणाल अहं यद पक्षी।
वर्जित कामगुणा बहुदोषा नो च वशं प्रमदान गतो ऽहम्॥

आसि शशो वनगुल्मनिवासी शासति तं सुकृते शशवर्गम्।
मुनिराश्रमवासि क्षुधार्तस्तस्य कृतेन मयाश्रयु त्यक्तः॥

आसि शुको द्रुम पुष्पफलाढ्ये शुष्कद्रुमो न च मे स हि त्यक्तः।
दृष्ट कृतज्ञ तदा मम शक्रस्तं कृतवांस्तरु पत्रफलाढ्यम्॥

वानरसंघमुपद्रुत दृष्ट्वा नागनृपेण विवर्जितदेशम्।
राजभयात्तु विमोक्षित ते मे वानरराज अहं यद आसीत्॥

शुक भूत पुरा गुरुहेतोः शालि हरंश्च नरेण गृहीतः।
किं नु शुका हरसे मम शालि नाशयते [9 b] ऽपि च पक्षि मुशस्यम्[1]॥

शुक सो ऽब्रवीद्दह शृणुष्व चौर्य हरामि न ते अहु शालिम्।
जीर्णगुरुद्वयपोषणहेतोः शालि हरामि कृपार्थ तु तेषाम्॥

बीज प्रकीर्ण यदा प्रथमं ते भाग[2] ददामि सर्वजनस्य।
तच्च गिरं वदतो मम श्रुत्वा तेनापि चौर्य भवेन्न कदाचित्॥

साधु शुका हर शालि यथेष्टं दुर्लभ मानुष यस्यिमु भक्तिः।
मानुष त्वं वय तीर्यगतेहा साधु दमः शम संयम तुभ्यम्॥

इत्येवमादिचरितानि पूर्व चरन्त दुष्करकृतानि।
न च मे मनसि तत्रभवि खेद एषत उत्तमां विरजबोधिम्॥

आध्यात्मिकं ह्यथ च बाह्यं नास्ति हि वस्तु यन्मया न दत्तम्।
शीले च क्षान्ति तथ वीर्य ध्यान उपाय प्रज्ञ चरितो ऽहम्॥

मांसं त्वचं तथपि च मज्ज शोणितमेव दत्तं स्वशरीरात्।
प्रान्ते गुहासु च यदा मे शोषित आश्रयो ऽपि चरता मे॥

धुतयान[3] देशित जिनेभिः यत्र प्रयुज्यतो जिन भवन्ति।
तत्र धुते सततं च प्रयुक्तो आसि चरन्त पुरे अहु नित्यम्॥

---

1) Corr. *masasyam* (= matsasyam).
2) MS. भागु ददामि सर्वजनस्य.
3) MS. धुन.

एतादृशा व्रत उदारा ये च निषेविता चरता मे ।
श्रुत्वा च तेषमिमाश्चर्यमेकपदे न भविष्यति छन्दः ॥

हास्यु भविष्यति इम श्रुणित्वा शासनमेतदेव च तदानीम् ।
आहारमैथुनपरास्ते मिद्धमदाभिभूत शतकाङ्क्षाः[1] ॥

धर्मद्विषः सद अनार्याः शासनदूषका गुणविहीनाः ।
श्रुत्वा च धर्ममिम शान्तं नैष जिनोक्त इत्यभिवदन्ति ॥

आचार्यो मे श्रुतसमुद्रो आसि बहुश्रुतः कथिकश्रेष्ठः ।
तेनापि चैष प्रतिषिद्धो बुद्धवचो हि नैष तु कथंचित् ॥

परतो ऽप्यभूदपि च वृद्धः तस्य गुरुः स शामितगुणौघः ।
तेनापि नैष हि गृहीतो मात्र प्रयुज्यथ वितथमेतत् ॥

यत्रात्म नास्ति न च जीवो देशित पुद्गलो[2] ऽपि न कथंचित् ।
व्यर्थः श्रमो ऽत्र घटते यः शीलप्रयोग संवरक्रिया च ॥

यद्यस्ति चैव महायानं नात्र हि आत्मसत्व मनुजो वा ।
व्यर्थः श्रमो ऽत्र हि कृतो मे यत्र न चात्मसत्वउपलब्धिः ॥

कवितानि हैव स्वमतानि पापमतैः कुतीर्थिकमतैश्च ।
भाषेत नो जिन कदाचित् वाचमिमां हि भिक्षुपरिभाषाम् ॥

अपत्रा[3]पशीलरहिताश्च ध्वाङ्क्षप्रगल्भउद्धतप्रचण्डाः ।
भविता हि भिक्षव ममेह शासनि ईर्ष्यमानमददग्धाः ॥

1) MS. ध्वाङ्क्षाः.
2) MS. पुद्गला.
3) MS. ह्रीरपत्राप्य. Il faut lire sans doute *hrīr apatrāpa*, le premier de ces mots étant une glose marginale introduite dans le texte.

विध्यन्त हस्त तथा पादांश्चीवरकर्णिका निधुनन्तः ।
काषायकण्ठ विचरन्ता ग्रामकुलेषु मद्यमदमत्ताः ॥

बुद्धस्य ते ध्वज गृहीत्वा सेवकारा[1] गृहस्थजनतायाम् ।
लेखं वहन्ति सततं ते शासनदं विहाय गुणराशिम् ॥

गो[2]गर्दभाश्वपशुदानात्संभवते [10a] हि दास्य पि तेषाम् ।
कृषिकर्म[3]वाणिज्यप्रयोगा युक्तमनाश्च ते ऽनिशमनार्याः ॥

नैषामनार्यमपि वाच्यं नैव च किंचिदस्ति यदकार्यम् ।
स्तौपिक सांघिकं ह्यपि च वित्तं पौद्गलिकं च तच्च सममेषाम् ॥

भिक्षुणा वीक्ष्य च गुणाढ्यं तेष्वपि चाप्यवर्णा कथयन्ति ।
दुःशीलवञ्चक प्रविश्य कुहास्ते स्त्री च विनाशयन्ति हि सुघोराः[4] ॥

गृद्धो गृहीण तथा कामैर्यादृशो प्रव्रजित्व ते गृद्धाः ।
भार्याः सुता दुहितरश्च तेषु भविष्य गृहिसमानम् ॥

यत्रैव सत्कृत कुले ते चीवरपिण्डपातपरिभोगैः ।
तस्यैव दारपरिगृद्धा क्लेशवशानुगाः सद अनार्याः ॥

कामा इमे खलु न सेव्याः[5] प्रातन[6] तिर्यक्प्रेतनिरयेषु ।
वक्ष्यन्ति ते सद गृहीणां ते च स्वयमदान्त अनुपशान्ताः ॥

1) MS. सेवकराजगृह°.
2) MS. गोह्यगर्दभाश्वपशुदा संभवते.
3) MS. °कर्मविजय.
4) MS. सुघोरः
5) MS. सव्याः.
6) Corr. *pātana*.

स्वयमेव ते यथ अदान्ताः शिष्यगणो ऽपि तेष न सुदान्तः ।
आहारमैथुनकथायां रात्रिदिवानि तेषु गमिष्यन्ति ॥

सेवार्थमेव न गुणार्थं ते खलु संग्रहं ददति तेषाम् ।
शिष्यगणैः स्वकैः परिवृतो ऽहं पूज जने सदात्र चल सिध्य ॥

कथयन्ति ते ऽपि च जनस्य संग्रह एष मे करुणायैषाम् ।
उपस्थान प्रार्थयामि तेभ्य शिष्यगणेभ्य[1] एव न कदाचित् ॥

रोगाभिभूतबहु तत्र कुष्ठिलाश्चित्रगात्रसुविरूपाः ।
प्रव्रजिष्यन्ति नरकेषु[2] आगता आगता सह अनार्याः ॥

उद्देशसंवरविहीना भिक्षुगुणेषु ते सह वियुक्ताः ।
गृहिणो न ते ऽपि न च भिक्षू वर्जित ते यथा श्मशान इव दारुः ॥

शिक्षासु चादर न तेषां स्यान् न च प्रतिमोक्षविनये वा ।
उद्दामगाः स्ववशगास्ते अङ्कुशमुक्तका इव गजेन्द्राः ॥

वनवासिनामपि हि तेषां ग्रामगतं भविष्यति हि चित्तं ।
क्लेशाग्निना प्रपतितानां चित्तमवस्थितं हि न च तेषाम् ॥

विस्मृत्य बुद्धगुणासर्वान् शिक्षधुतांश्च ते ऽपि च उपायान् ।
मदमानदर्पपरिपूर्णा ते प्रपतन्ति दारुणामवीचीम् ॥

राजकथारताश्च सततं ते चोरकथाभिकीर्त्तनरताश्च ।
ज्ञातिनिषेवने च निरतास्ते चिन्तयमान रात्रिंदिवसानि ॥

1) MS. शिक्ष°.
2) MS. नरतेषु.

ध्यानं तथाध्ययनं त्यक्ता नित्य विहारकर्मणि नियुक्ताः ।
आवासगृध्रभृकुटीकास्ते च अदान्तशिष्यपरिवाराः ॥

न च कर्मिको ह्यहं विहारे आत्मनहेतुरेष हि कृतो मे ।
ये भिक्षवो ममानुकूलास्तेष्ववकाशमस्ति हि विहारे ॥

ये शीलव[10 b]न्त गुणवन्तो धर्मधरा जनार्थमभियुक्ताः ।
दमसंयमे सतत युक्ताः संग्रह तेषु ते न कुरुते च ॥

लयनं ममैतदुद्दिष्टं सार्धविहारिणो ऽपि च ममेदम् ।
संमोदिकस्य च ममेदं गच्छ न ते ऽस्ति वास इह कश्चित् ॥

शय्यासनं निखिलदत्तं भिक्षवः स्थापिता इह प्रभूताः ।
न च लाभसंभव इहास्ति किं परिभोदयसे ऽत्र व्रज भिक्षो ॥

शय्यासनोद्दिशन तेषां नैव भविष्यते ऽपि च कदाचित् ।
गृहिसंचयाश्च भवितारस्ते च प्रभूतभाण्डपरिवाराः ॥

निर्भर्त्सितापि च समन्तात्ते हि ममीरसाश्चरिमकाले ।
वचनं न चैते मम हि स्मृत्वा प्रान्तवने तदाभिनिवसन्ति ॥

हा शासनं जिनवरस्य नाशमुपेद्य हि न चिरेण ।
लाभाभिभूतगुणाद्विष्टा भिक्षवः प्रादुर्भूत बहु यत्र ॥

परिभूतकाश्च सततं ते पश्चिमकालि शीलगुणयुक्ताः ।
ते चाप्यरण्यवनवासी ग्राम विहाय राष्ट्रनगराणि ॥

सह सत्कृता गुणविहीना भेदकसूचकाः कलहकामाः ।
ते शास्तृसंमत जनस्य ते च भविष्यन्ति मानमददग्धाः ॥

इम शासनं गुणनिधानं सर्वगुणाकरं परमरम्यं[1] ।
नाशं प्रयास्यति ममेह शीलविपत्तिरीर्ष्यमददोषैः ॥

रत्नाकरो यथ विलुप्तः स्थास्यति पद्मिनीव परिशुष्का ।
यूप वररत्नमयं भग्नं नश्यति शासनं चरिमकाले ॥

एतादृशश्चरिमकाले धर्मविलोप वर्त्तति सुघोरः[2] ।
त चापि भिक्षव अदान्ता नाशयितार शासनं ममेदम् ॥

इम चर्यसे[3]वनिरतानां दूरत संगतिः क्वचन तेषां ।
प्रेतगतिर्नरके ऽपि च वासः तिर्यगतिश्च इतो हि च्युतानाम् ॥

अनुभूय तीव्रकटुकानि दुःखमनन्त वर्षशतमनेकैः ।
लब्ध्वा स मानुषभवं वा जायति दुःखितः सतत शोच्यः ॥

अन्धो ऽथवा बधिर काणो जायति चित्रगात्र सुविरूपा ।
बीभत्सरूपभयदर्शी पापचरीमिमां सतत सेवी ॥

विश्रम्भते ऽस्य न च कश्चित् श्रद्दधते ऽस्य चापि न च वाक्यम् ।
निर्भच्छितो भवति नित्यं यो ऽभिनिषेवते विषमचर्याम् ॥

ते रोगदुःखशततप्तास्ताडित लोष्टकाष्ठप्रहारेभिः ।
क्षुत्तृष्णायेन परितप्तास्ते च भवन्ति सदा सुपरिभूताः ॥

दुःखा अनन्त इति ज्ञात्वा दूर पापचर्य विवर्जित्वा ।
सेवेथ साधुचरि नित्यं मा भवितानुताप इह पश्चात ॥

1) MS. °रम्याः.
2) MS. एतादृशाश्च° सुघोरे.
3) MS. सव.

यस्य प्रियो भवति बुद्धो आर्यगणाश्च शिक्षधुतधर्माः ।
अभियुज्यथा सततमेवं त्यक्त्व च ज्ञातिला[11 a]भयशःकीर्ति ॥

मायोपमं हि दुरमेतत्स्वप्नसमं च संस्कृतमवीद्यम् ।
न चिराद्भविष्यति वियोगः सर्वप्रियैर्न नित्यमिह कश्चित् ॥

उद्युज्यतां घटत नित्यं पारमितासु भूमिषु बलेषु ।
मा जातु संशयत वीर्यं यावन्न बुध्यथा प्रवरबोधिम् ॥

निदानपरिवर्तः प्रथमः ॥

II.

द्वितीयः परिवर्तः

यद्भूयसा राष्ट्रपाल बोधिसत्त्वयानीयानां पुद्गलानामिमे दोषा भविष्यन्ति । अनभियुक्ता अनभियुक्तान् पूजयिष्यन्ति शठाः शठान् पूजयिष्यन्ति अज्ञा अज्ञान्सत्कर्तव्यान्मन्यन्ते । आमिषप्रियाश्च भविष्यन्ति । अध्यवसाने बहुलाः कुलमत्सराः शठा ध्वाङ्क्षा मुखराः[1] कुहका ज्ञात्रगुरुकाः । अन्योन्यवर्णभाषनतया लाभं निष्पादयिष्यन्ति लाभपर्येष्ट्यर्थं च ते ग्रामं प्रवेक्ष्यन्ति न सत्त्वपरिपाकार्थं न सत्त्वानुकम्पार्थं । ते अज्ञानिनो ज्ञाननिमित्तात्मानं प्रतिज्ञास्यन्ति । कथं मां परे विजानीयुः । बहुश्रुतः कल्याणधर्म इति । अगौरवाश्च भविष्यन्ति यथात्रानभियुक्ताः । भिन्नभाजनीभूता भविष्यन्ति अन्योन्यस्खलितगवेषिणः । नष्टप्रयोगा अज्ञाः कुशीदाज्ञाना नवकल्पनबहुलाः । अन्योन्यभिन्नधर्मसंगायनतया स्वच्छन्दा दृढवैरा आकीर्णव्यापादा अयुक्तपरिभाषाञ्जनसंज्ञत्या इह शासने चरिष्यन्त्यापरिपृच्छनशीलाः । धर्मश्रवणेनानर्थिकाः । अयुक्तचर्यया दरिद्रकुलेषूपपत्तिं परिगृह्णीष्यन्ति ते दरिद्रकुले प्रव्रजिताः समानालाभमात्रकेनेह शासने तुष्टिमुत्पादयिष्यन्ति । तेषामत्ययदेशनापि न भविष्यति किं पुनर्ज्ञानाभिसमयः । ते बुद्धगुणाविचित्वा ज्ञात्रलाभमात्रकेन श्रवणा स्म इत्यात्मानं प्रतिज्ञास्यन्ति । नाहं राष्ट्रपाल तेषां तथारूपाणां पुद्गलानामानुलोमिकामपि क्षान्तिं वदामि कुतः पुनर्बुद्धज्ञानं । सुगतिस्तेषां दूरे किं पुनर्बोधिः । तेषां पुना राष्ट्रपाल तथारूपाणां पुद्गलानामष्टौ बोधेः परिपन्थकरान्धर्मान्वदामि । कतमानष्टौ । अपायोपपत्तिः दरिद्रकुलोपपत्तिः प्रत्यन्तजनपदोपपत्तिः नीचकुलोपपत्तिर्दुर्वर्णतान्धत्वगतिकाः पापमित्रसमवधानं बहुमान्यता विषमा परिहारेण कालक्रियाः । इमान्राष्ट्रपाल अष्टौ धर्मान्बोधेः परिपन्थकरान्वदामि । तत्कस्य हेतोः । नाहं राष्ट्रपाल वचनप्रति-

1) MS. मुषराः.

ज्ञस्य बोधिमिति वदामि । न कुहकस्य चर्यापरिशुद्धिं वदामि । न शठस्य बोधिचर्यां वदामि । नामिषगुरुकस्य बुद्धपूजां वदामि । नाभिमानिनः प्रज्ञापरिशुद्धिं वदामि । नाहं दुष्प्रज्ञसमन्वागतस्य संशयच्छेदनं वदामि । नाहं मत्सरिण आशयपरिशुद्धिं वदामि । नाहमनधिमुक्तिबहुलस्य धारणीप्रतिलाभं वदामि । नाहमसद्गुणपर्येषकस्य सुगतिप्रतिलाभं वदामि । न कुलमत्सरस्य कायपरिशुद्धिं वदामि । नाहमकल्पितार्यपथस्य बुद्धसमवधानं वदामि । न कुलाध्यवसितस्य वाकपरिशुद्धिं वदामि । नं गौरवस्य चित्तपरिशुद्धिं वदामि । नाहममात्रज्ञस्य धर्मकामतां वदामि । न कायजीवितसापेक्षस्य धर्मवेष्टिं वदामि । नाहं राष्ट्रपाल षट्शास्तॄंस्तथा विगर्हामि यथा तान्मोहपुरुषान्विगर्हामि । तत्कस्य हेतोः । अन्यथावादिनस्ते ऽन्यथाकारिणः ' विसंवादकाः सदेवकस्य लोकस्य ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ।

[1]असंयता उद्धत उन्नताश्च अगौरवा मानिन लाभ उत्सदा ।
क्लेशाभिभूताः सखिलाः सकिंचनाः सुदूर ते तादृश अग्रबोधये ॥

लाभाभिभूतस्य कुसीद वर्द्धते कुसीदभूतस्य प्रणष्ट श्रद्धा ।
श्रद्धाविपन्नस्य प्रणष्ट शीलं दुःशीलभूतस्य प्रणष्ट संगतिः ॥

दरिद्रभूताश्च हि प्रव्रजित्वा दारिद्र्यमुक्तां समवाप्य पूजाम् ।
तैः काञ्चनो भारमिवापविद्धः ससस्य भारः पुनरुद्गृहीतः ॥

लाभा[2]र्थिको ऽरण्यमुपेति वस्तुं गवेषते तत्र गतश्च ज्ञातीन् ।
अभिज्ञाविद्याप्रतिभान[3]संपदो विहाय गृह्णाति स चापि ज्ञातीन् ॥

अपायभूमिं गतिमक्षणेषु दरिद्रतां नीचकुलोपपत्तिम् ।
ज्ञात्यन्धदौर्बल्यमथाल्पस्थामतां गृह्णन्ति ते मानव शेणमूढाः ॥

1) Mètre: Upajāti, Indravamçā, Vamçasthā.
2) MS. लाभातिको. 3) MS. संपदा . . . ज्ञातॄन्.

ते वृत्तिचर्यापरिहीनभावाः प्रमादलाभेन स्मृतिप्रणष्टाः।
घोरं प्रयास्यन्ति महाप्रपातं यतो न मोक्षोऽस्त्यपि कल्पकोटिभिः॥

यदीह लाभेन भवेत बोधिस्तद्देवदत्तोऽपि लभेत बोधिम्।
वैरम्भवातेन यथैव पक्षी क्षिप्यन्ति लाभेन तथा अयुक्ताः॥

पुण्यैर्विहीनाः परदारगृद्धाः अशुद्धशीलाः कुशलेषु बोद्धरः।
ते शासने ऽनर्थश्मशानदारुवत् ये बोधिचित्तेन अलब्धज्ञानाः॥

बोध्यर्थिको ऽन्वेषति बुद्धधर्मान् न तिष्ठते चापि यथा समीतः।
दृढः स लेपेन कृतः कपिर्वा मानाभिभूतस्य तथैव बोधिः॥

बोध्यर्थिकेनापि मया स्वजीवं त्यक्त प्रियं धर्मपदस्य हेतोः
त्यक्ता च धर्मास्त अयुक्तयोगाः निरर्थभूता निपतन्ति शासनम्॥

महा[12a]प्रपातं ज्वलितं हुताशनं सुभाषितार्थे पतितोऽस्मि पूर्वे।
श्रुत्वा च तस्मिन् प्रतिपत्तिये स्थितो विहाय सर्वाणि प्रियाप्रियाणि॥

श्रुत्वा गुणाढ्य च विचित्रशासनं तेषां स्पृहा नैकपदेऽपि जायते।
अधर्मकामस्य कुतोऽस्ति बोधिः यथैव चान्धस्य पथि पकाशनमिति॥

भूतपूर्वं राष्ट्रपालातीते ऽध्वन्यसंख्येयैः कल्पैरसंख्येयतरैरचिन्त्यैरतुल्यैरप्रमाणैर्विपुलैरप्रमेयैर्यदासीत्तेन कालेन तेन समयेन सिद्धार्थबुद्धिर्नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उदपादि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवमनुष्याणां च बुद्धो भगवान्। तेन च समयेनार्चिष्मान्नाम राजाभूत्। अर्चिष्मतः पुना राष्ट्रपाल राज्ञो जम्बूद्वीपे राज्यमभूत्षोडशयोजनसहस्राणि। तेन च राष्ट्रपाल कालेन तस्मिञ्जम्बूद्वीपे

विंशतिनगरसहस्राण्यभूवन्सर्वाणि कुलकोटिसहस्रिकाणि। तस्य खलु पुना राष्ट्रपाल राज्ञो ऽर्चिष्मतो रत्नप्रभासं नाम नगरमभूद्राजधानी यत्र स राजार्चिष्मान्प्रतिवसति। द्वादश योजनान्यायामेन पूर्वेण पश्चिमेन च सप्त योजनानि विस्तरेण दक्षिणेनोत्तरेण च सप्तानां रत्नानां च सप्तप्राकारमष्टापदसुकृतं। तेन च समयेन दशवर्षकोटिनियुतानि सत्त्वानामायुःप्रमाणमभूत्। राज्ञः पुना राष्ट्रपालार्चिष्मतः पुण्यरश्मिर्नाम पुत्रो ऽभूदभिरूपः प्रासादिको दर्शनीयः परमशुभवर्णपुष्कलतया समन्वागतः। तस्य जातमात्रस्यैवं निधानसहस्रं प्रादुर्भूतं सप्तानां रत्नानामेकं चात्र निधानं राज्ञः प्रासादे प्रादुर्भूतं दशपौरुषप्रमाणं सप्तानां रत्नानां। तस्य खलु पुना राष्ट्रपाल पुण्यरश्मे राजकुमारस्य जातमात्रस्यैव सर्वे जाम्बूद्वीपकाः सत्त्वा आत्तमनसोऽभूवन्। ये च सत्त्वा बन्धनगतास्तेषां बन्धनमोक्षोऽभूत्। तेन खलु पुना राष्ट्रपाल पुण्यरश्मिना राजकुमारेण सप्तभिर्दिवसैः सर्वशिल्पान्यधिगतानि यावन्ति लौकिकानि।

अथ खलु राष्ट्रपाल पुण्यरश्मे राजकुमारस्य शुद्धावासकायिका देवता अर्धरात्रकालसमये संचोदयन्ति स्म। अप्रमत्तेन ते कुमार सदा भवितव्यम्। अनित्यताप्रत्यवेक्षणाकुशलेन भवितव्यम्। अल्पं हि कुमार जीवितं मनुष्याणां गमनीयः संपरायः परलोकभयदर्शिना च ते भवितव्यं न कर्मक्रियोद्धरेण। तस्यां वेलायामिमा गाथा अभाषत।

(1) मा कुमार भव सुप्रमत्तको मा प्रमादवशमभ्युपेष्यसे।
अप्रमाद सुगतेन वर्णितो निन्दिता हि सुगतैः प्रमत्तकाः॥

अप्रमत्त इह ये च सूरता दानसंयमरता [12b] अमत्सराः।
सर्वसत्त्वकृपमैत्रमानसा ते भवन्ति नचिरा नरोत्तमाः॥

ये प्रमेयसुगता अतीताः सांप्रतं च हि येऽप्यनागताः।
सर्व एव कुशलैस्त उद्गता अप्रमादपथ एव सुस्थिताः॥

---

1) Mètre: Rathoddata.

अन्नपानमथ वस्त्रभोजनं हेमरूप्यमणिमुक्तिभूषणम् ।
दत्तं तैरपि च कल्पकोटियः प्रार्थयद्भिरिह बोधिमुत्तमाम् ॥

हस्तपादमथ कर्णनासिकां याचिता ददति संप्रहर्षिताः ।
सर्वबोधिगुणपूरिताशयाम् ते भवन्ति नचिरा नरोत्तमाः ॥

राज्यसौख्यविभवांश्च सर्वशो विप्रहाय दयिता स्त्रियोऽपि च ।
रङ्गमायसदृशं हि संस्कृतं संश्रयस्व वनमेव निस्पृहः ॥

जीवितं चपलमध्रुवं सदा मृत्तिकाघटक एव भेदि च ।
याचितोपममशाश्वतं सदा नात्र नित्यमशुभं कुमारक ॥

नेह मात्र न पिता न बान्धवा धारयन्ति पतमान दुर्गतिम् ।
यत्कृतं हि मनुजैः शुभाशुभं तत्प्रयान्तमनुयान्ति पृष्ठतः ॥

कामहेतु बहुकल्पसागरा अन्यमन्यवधिता निरर्थकाः ।
कस्यचिन्न च कृतं त्वया हितं व्यर्थ एव च निवेशितः श्रमः ॥

[1]अद्य ते जगत एषतो हितं बोधिशान्तमतुलं पदोत्तमम् ।
मज्ज मांसमपि चर्म शुष्यते यद्यपि त्वमपि माकृथा श्रमम् ॥

दुर्लभो हि सुगतस्य संभवः शान्तधर्मश्रवणं सुदुर्लभम् ।
मारपक्षमवधूय यत्नतो बुद्धज्ञान नचिरेण लप्स्यसे ॥

भद्रमित्रपरिसेवकः सदा पापमित्रपरिवर्जको भव ।
सत्पथे उपनयन्ति ते सदा दुष्पथा च सततं निवारकाः ॥

1) MS. मोद्य.

साधु वीर्यमपि कृत्य सुस्थिरं कायजीवितस्पृहां विहाय च ।
वज्रकल्पहृदया दृढाश्रया बुद्धमार्गमिममेव सुश्रुतम् ॥

दुर्लभं पदवरं ह्यनुत्तरं सर्व एव पुरिमा नरोत्तमा ।
अरण्यगोचररताः प्रभंकराः तेष त्वं चर[1] पथेऽनुवर्त्तकः ॥

अरण्यवासनिरतः सदा भव मातृपुत्रपितृबान्धवान् प्रियान् ।
विप्रहाय सकलं सुहृज्जनम् कायजीवितकृतामपि तृष्णाम् ।
एषताद्य विपुलं सुगतज्ञानसंचयम् एषता पदवरं ह्यनुत्तरम् ॥

अथ खलु राष्ट्रपाल पुण्यरश्मी राजकुमारस्तत उपादाय दशभिर्वर्षैर्न जातु स्त्यानमिद्धमवक्रामितवान्न जातु हसितवान्न क्रीडितो न रमितः न परिचारितो न जातूद्यानभूमिं गतो न जातु सखायान् दृष्ट्वा विस्मितः । न जातु गीताभिलाष्यभूत् । न राज्यधनगृहनगरेषु स्पृहामुत्पादितवान् । एवं सर्ववसुषु अनपेक्षोऽभूत् । एकप्रध्यायमानः स्थितोऽभूत् प्रतिसंलीनः परमदौर्बल्यभावं विचिन्तयन् । असारमित्वरं च लोकमनाश्वसन्[2] । अप्रियसमवधानं [13a] प्रियविनाभावं बालोल्लापनं संसाररतिनिरास्वादं राज्यसुखं विमोघधर्मं भवाभिष्टं शमतृप्तं पृथग्जनत्वं सदा विरुद्धं । बालागुह्वजनमध्यगतोऽस्मि यन्न्वहं तूष्णीभावेनातिनामयेयं । स एकान्ते तूष्णीभूतः ' अप्रमादं विचिन्तयन् प्रियविनाभावमेकाकी विहरति स्म ।

अथ खलु राष्ट्रपाल राज्ञार्चिष्मता अन्यतरस्मिन् पृथिवीप्रदेशे रतिप्रदानं नाम नगरं मापितमभूत्कुमारस्य परिभोगार्थम् । दक्षिणेनोत्तरेण च सप्त वीथीशतानि सप्तभिः प्राकारैः समन्ततोऽनुपरिक्षिप्तमभूत्सप्तरत्नमयैः किङ्किणीजालसमुच्छ्रितैर्मुक्ताजालरत्नयष्टिवितानैः सर्वेषु च वीथीमुखेषु अशीतिरत्नयष्टिसहस्राणि स्थापितान्यभूवन् सर्वस्यां च रत्नयष्ट्यां यष्टिरत्नसूत्रसहस्राणि निबद्धान्यभूवन् सर्वत्र च रत्नसूत्रे चतुर्दश

1) MS. चरि.
2) MS. अनास्वासन्.

तालपङ्क्तिकोट्यो निबद्धान्यभूवन् । यासां वातेनेरितानां वातसंघट्टितानां तद्यथापि नाम तूर्यशतसहस्रस्य घोषशब्दः स्यात् । सर्वेषु च वीथीमुखेषु पञ्च पञ्च कन्याशतानि स्थापितान्यभूवन् गीतकुशलानि नृत्तकुशलानि प्रथमयौवनप्राप्तानि सर्वजगत्परिभोग्यानि। तासां च राज्ञार्चिष्मता आज्ञा दत्ताभूत् । रात्रिंदिवं भवतीभिर्नान्या कथा कार्या ' अन्यत्र नृत्तगीतवादितेन । [1]सर्वे रञ्जयितव्या ये केचिच्चतुर्षु दिक्ष्वागच्छन्ति । अप्येवं नाम कुमारस्य रतिचित्तमुत्पद्येत । न च कस्यचित् सत्वस्यापनायं वक्तव्यं । तेषु च पुनः सर्ववीथीमुखेषु अन्नमन्नार्थिकेभ्यो दीयते पानं पानार्थिकेभ्यः ' यानं यानार्थिकेभ्यो यावद्वस्त्रगन्धमाल्यविलेपनशय्योपाश्रयजीवितपरिष्कारं सुवर्णरूप्यमणिमुक्ताविडूर्यशङ्खशिलाप्रवाडजातरूपरजतहस्त्यश्वशो धनं सर्वाभरणं रत्नराशयश्च स्थापिता अभूवन्सर्वजनपरिभोगार्थं ॥

तेन च समयेन मध्ये नगरस्य समन्ततोयोजनं गृहं कुमारस्य मापितमभूत्परिभोगाय सप्तानं रत्नानामष्टापदनिबद्धं तोरणशतप्रतिमण्डितं । तत्र चैकः प्रासादः कारितो ऽभूत् ' यत्र चतस्रः शयनकोट्यः प्रज्ञप्तमभूत्कुमारस्य परिभोगार्थं । तत्र च मध्ये उद्यानं मापितमभूत्सर्वपुष्पवृक्षसर्वफलवृक्षसर्वरत्नवृक्षप्रतिस्फुटं संछादितमभूत् । तस्य खलु पुना राष्ट्रपालोद्यानस्य मध्ये [2]पुष्करिणी कारिताभूत् सप्तरत्नमयी चतूरत्नसोपानी । तद्यथा सुवर्णस्य रूप्यस्य वैडूर्यस्य स्फटिकस्य । अष्टोत्तरं च सिंहमुखशतं [13 b] येन गन्धोदकं प्रविशति तस्याः खलु पुनः पुष्करिण्याः । अष्टशतमेव सिंहमुखानां येन पुनरेव तद्वारि निर्वहति । उत्पलपद्मकुमुदपुण्डरीकैः सततसमितं संपुष्पिता समन्ततश्च रत्नवृक्षपरिवारिता सर्वकालिकैश्च पुष्पफलवृक्षैः परिस्फुटा । तस्याः पुष्करिण्याः तीरे अष्टशतं रत्नवृक्षाणां मापितमभूत् । सर्वस्मिन् रत्नवृक्षे षष्टि षष्टि रत्नसूत्राणि निबद्धानि । सर्वत्र च तालपङ्क्तिकोट्यो निबद्धास्तासां च वातेनेरितानां वातसंघट्टितानां शब्दो निश्चरति स्याद्यथापि नाम तूर्यशतसहस्रस्य संप्रवादितस्य । सा च पुष्करिण्युपरि रत्नजालसंछादिताभूत् ' मा कुमारस्य रजो पांशुर्वा शरीरे निपतिष्यतीति ॥

1) MS. सर्वा. 2) Ici et plus bas le MS. a पुष्किरिणी au lieu de पुष्करिणी.

तेन च समयेन तस्मिन्प्रासादे चतस्र आसनकोट्यः प्रज्ञप्ता अभूवन्सप्तरत्नमय्यः सर्वस्मिंश्चासने पञ्च पञ्च [1]दूष्यशतानि प्रज्ञप्तान्यभूवन् । तत्र च मध्ये आसनं प्रज्ञप्तं सप्तरत्नमयं सप्तपौरुषमुच्चत्वेनाशीतिदूष्यकोटिभिः प्रज्ञप्तं यत्र पुण्यरश्मी राजकुमारो निषत्स्यत इति । सर्वत्र चासनमूले अगरुगन्धघटिका धूप्यते । त्रिष्कृत्वो दिवसस्य त्रिष्कृत्वो रात्रेः पुष्पसंस्तरः क्रियते । सुवर्णाच्छदनाच्छादितं सुवर्णपद्मप्रलम्बितं मुक्ताजालविततं मणिरत्नप्रभावभासितमशीतिसहस्रप्रलम्बितं । सर्वत्र च रत्नवृक्षे पताकाशतानि प्रलम्बितान्यभूवन् । सर्वत्र चोद्याने नवतिर्मणिरत्नशतसहस्राणि योजनप्रभाणि स्थापितान्यभूवंस्तेषां च प्रभया सर्वलोको ऽवभासितो ऽभूत् । तस्मिन्पुना राष्ट्रपालोद्याने शुकसारिकक्रौञ्चकोकिलमयूरहंसचक्रवाककुनालकलविङ्कजीवंजीवका मनुष्यप्रलापिनः पक्षिणो ऽभूवन् । येषां निकूजितानि नदतां नन्दने देवानामिव मदनीयः शब्दो निश्चरति । कुमारस्य च परिभोगार्थं पञ्चरसशतप्रकाराणि भोजनानि सततसमितमभिसंस्कृतान्यभूवन्सर्वाकारसंपन्नानि ॥

तेन च पुनः समयेन विंशत्वर्षाः समानाः षोडशवर्षातिक्रान्ताः कुमारकाः सर्वनगरेभ्यः समुदानीय तत्र च नगरे प्रवेशिता अभूवन्सर्वशिल्पस्थानकर्मस्थानविधिज्ञाः सर्वलौकिकरत्युपकरणविधिज्ञानामशीतिकोट्यः तस्मिन्नगरे प्रवेशिता अभूवन् । तस्य मातापितृभ्यां कोटिः कन्यानां दत्ता ज्ञातिसंघेन कोटिः नैगमजानपदैः कोटिः सर्वराजेन कोटिः कन्यानां दत्ता अभूवन् । ताश्च सर्वा अभिरूपाः प्रासादिका दर्शनीयाः सर्वाः षोडशवर्षप्रमाणा जात्या गीतकुशला वाद्य[14a]कुशला नृत्तकुशला हसितकुशलाः पुरुषोपसंक्रमणकुशला आर्जवाः शिशवा मधुरा वृद्धाः पूर्वाभिलापिन्यः स्मितमुखाश्चोपचारकुशलाः सर्वकलासुविधिज्ञा नातिदीर्घा नातिह्रस्वा नातिकृषा नातिस्थूला नातिगौर्यो नातिश्यामाः । यासामुत्पलगन्धो मुखात् प्रवाति चन्दनगन्धो गात्रेभ्यः प्रवाति । व्यक्ता इव देवकन्यकाः ' एकान्तमनामयचारिण्यः । तासां मध्यगतः पुण्यरश्मी राजकुमारः संगीतिसंप्रभाणितेन तत्र च संगीतिशब्दे वाद्यशब्दे चैवं चित्तमुत्पादयति । महानमित्रसंघो वतायं मम प्रादुर्भूतः कुशलधर्मपरिमोषकः ।

1) MS. डुष्य. Id. à la ligne suivante.

हृत्तानपेक्षो भविष्यामि । स तस्मिन्समये स्याद्यथापि नाम वध्यः पुरुषो दृष्ट्वा न विस्मयचित्तमुत्पादयति । एवमेव पुण्यरश्मी राजकुमारः तां प्रमदां दृष्ट्वा न विस्मयति नापि तत्र नगरे न च सखीभिर्विस्मयति स्म । तैश्च दशभिर्वर्षैर्न जातु रूपनिमित्तमुद्गृहीतवान्न शब्दनिमित्तं न गन्धनिमित्तं न रसनिमित्तं न स्पर्शनिमित्तमुद्गृहीतवान् । अन्यत्रैवंरूपं चित्तं प्रवर्तयते स्म । कदा तावदेवंरूपादमित्रसंघमध्यान्मम मोक्षो भविष्यति । कदाहमप्रमादचर्यां चरिष्यामि येन मे मोक्षो भविष्यति । अथ खलु ताः कन्यकाः राज्ञोऽर्चिष्मत आरोचयन्ति स्म । न देव कुमारः क्रीडति न रमते न परिचारयति । अथ खलु राष्ट्रपाल राजार्चिष्मानशीतिभी राजसहस्रैः सार्द्धं येन पुण्यरश्मी राजकुमारस्तेनोपसंक्रम्य[1] अश्रुमुखः प्रवेपमानेन कायेन शोचमानो धरणितले प्रपतितः । स उत्थाय धरणितलात्पुण्यरश्मिं राजकुमारं गाथाभिरध्यभाषत ।

प्रेक्षस्व[2] पुत्रवररत्न मम प्रलापं शोकार्दितो निपतितोऽस्मि भुवि क्षपान्ते ।
केनाप्रियं तव कृतं मम तद्ब्रवीहि ज्येष्ठं ददामि यदिहास्य क्षणेन दण्डम् ॥

प्रेक्षस्व मेऽद्य नगरं सुरसंघरम्यं मनसा मयाभिरचितं यदिदं त्वदर्थे ।
किमिहाङ्गमद्य विकलं मम तद्वदाशु शक्रस्य वाद्य[3] विभवं तव दर्शयामि ॥

शोकार्दितं कमललोचनचारुनेत्रं स्त्रीसंघमप्सरसमं विलपन्तमीक्ष ।
एताभिरन्यैश्च रमस्व विनीय शोकं किं शल्यविद्ध इव ध्यायसि दीनवक्त्रः ॥

एताः स्वराङ्गरुचिराः सुरतैर्विधिज्ञाः संगीतिताडसमये च विनिश्चयज्ञाः ।
का[14 b]लस्तवाद्य सुरतस्य न शोचितस्य स्नानं सरोरुहमिवासि किमद्य दीनः ॥

उद्यानपुष्पफलपत्त्रविकीर्णशाखा उद्विद्धचित्रमिव चित्ररथं सुराणाम् ।
संचिन्तयस्व प्रथमं हि वयस्तवेदं कालो रते रम इहाद्य सुत प्रसीद ॥

1) MS. तेनोपसंक्रामनुपसंक्रम्य.

2) Mètre: Vasantatilakā. 3) Ex conj. MS. वद्ये.

तुल्या तवेयमपि पुष्करिणी सुराणां स्नानार्थमुत्पलसरोजवनाभिकीर्णा ।
पद्मानि मत्तवरषट्पदभूषितानि संचिन्त्य तां क इह नाभिरमेत पुत्र ॥

हंसा मयूर शुक सारिक कोकिलाश्च कोणाल जीव कलविङ्क मनोज्ञघोषाः ।
गन्धर्वमादन इवा हिमवत्समीपे श्रुत्वा नरः क इह नात्र रतिं लभेत ॥

एता विमान मणिचूडसमुक्तजाला वैडूर्यकाञ्चनचिता इव वैजयन्ते ।
रत्नासनानि च वराणि वरास्तृतानि चारुस्वरा कनककङ्कणतालपङ्क्तयः ॥

गम्भीरधीरवरतूर्यनिनादघुष्टा वीथीषु दानविसरास्तव चापि हेतोः ।
कन्याः सहस्रबहुगीतरुताः क्रियान्ते श्रूयन्ति नन्दनवनेऽप्सरसां यथैव ॥

कस्मात्त्रिविष्टपसमे भवने मनोज्ञे विक्षिप्तचित्त इह किं न रतिं करोषि ।
एते कुमार तव देवसमानगर्भाः क्रीडा सखाय सह पुत्र रमस्व चैभिः ।
माता पिता च तव संस्थित साश्रुकण्ठाः किं दुःख नास्ति करुणा च जने तवास्मिन् ॥

सोऽथाब्रवीद्गुणाचितो भवदोषदर्शी निर्विण्ण संस्कृतमनर्थिक कामभोगैः ।
संसारपञ्जरगतं जगदीक्ष्य चेदं मोक्षार्थिकः पितरमाह शृणुष्व देव ॥

देवाप्रियं मम कृतं न हि केनचिन्मे किं त्वस्ति मेऽद्य न हि कामगुणेषु छन्दः ।
सर्वे प्रिया रिपुसमा हि निरानुरक्ता ये क्लेशदुर्गतिप्रपात प्रपातयन्ति ॥

एता स्त्रियो ह्यबुधबालजनाभिरामा मारस्य पाशगुणबद्ध महाप्रपाताः ।
नित्यं तथा विगर्हित आर्यजनेन चैताः सेवामि किं नरकदुर्गतिशोकमूलाः ॥

एता स्त्रियो हि छविमात्रकरूप्यरम्याः स्नाय्वस्थिपत्त्रमशुचीभि निरर्थकोऽहं ।
प्रस्राविणी रुधिरमूत्रशकृन्मलानां व्यक्तं श्मशानसदृशीषु कथं रमेयम् ॥

गीतं न श्रोष्यमपि वाद्यकृतं न ग्राह्यं स्वप्नाय माभिरतयो ऽबुधमोहनाश्च।
संकल्पलालस गता अबुधा तु नाशं किं क्लेशदास इव बालजनो भविष्ये॥

सर्वे इमे द्रुमलता शिशिरे प्रवृत्ते कान्तारवृक्षसदृशा हि भवन्त्यरम्याः।
सर्वश्रियो विधमनी[1] हि अनित्यतेयं मोहात्प्रमादमुपयामि चले तु जीवे॥

चित्तं समुद्र इव तर्पयितुं न शक्यम् तृष्णाप्रवृत्तिनिरतः पुनरेव काङ्क्ष।
अन्योन्यघाति जगदीदृश हि कामहेतोः मेरुर्यथैव पवनैरहमप्रकम्प्यः[2]॥

न त्वं पिता न सहजा मम नापि भार्याः त्राता न बान्ध[15a]वजना नृपते ह्यपायात्।
सर्वे वयं तृणगता इव बिन्दुलेखा मा तात चित्तवशगा भवतां प्रमत्ताः॥

धिग्यौवनेन मनुजेश्वर यन्न नित्यं धिग्जीवितस्य गमनं गिरितोयशीघ्रं।
धिक्संस्कृतं जयमिदं तडिदभ्रलोलं धिक्काण्डितस्य त्रिभवे[3] नृप कामरागः॥

संचोदितोऽस्मि विबुधैर्भव अप्रमत्तो नो बोधिसत्त्व भवते विषयाभिलग्नः।
बुद्धो भवेयमिह लोकहितानुकम्पी नास्ति प्रमादचरितस्य नरेन्द्र बोधिः॥

कामातुरो भवति यो नृप चित्तदासः स हि पुण्यनाशनिरतो विनिवृत्तस्वर्गः।
हिंसासमिद्धमपि नाभिचरेत जातु पक्षीव पञ्जरगतः कथमाश्वसेत॥

धातूश्च सर्पसदृशा वधकाश्च स्कन्धाः चित्तं च साश्रवमनर्थकशून्यग्रामः।
विषस्तम्बपुष्पित इवेह नरेन्द्र कायः श्रोघे ऽतिरुह्यति कथं नु रतिर्ममात्र॥

संप्रेक्षसे जगदिदं कुगतिप्रपन्नं व्यक्तं पदं गगनतुल्यमपि ज्वलन्तम्।
तेषां प्रमोक्षणनिमित्तमिहाद्य राजन् शिवधर्मनाव समुदानयितास्मि शीघ्रम्॥

1) Ex conj. MS. विविधमणीभि.
2) MS. इह अप्रकम्प्यः.
3) MS. तृभवे.

सुप्तान्विबोधयितुमातुर जीवितार्थं शल्यं निमूलयितुमुत्पथगान् विनेतुम्।
प्रोद्धुष्य बन्धनविमोक्ष महासहस्रे संतर्पयंश्चिरदरिद्र सुभाषितेन॥

मोदन्त दुर्गतिपथादपि चोद्धरिष्ये अन्धे चक्षुरपि तृष्णालताविशोषी।
प्रज्ञार्चिरुत्तमविमुक्तिकृतप्रदीपो ह्रदयन्ति येन त्रिभवं नटरङ्गकल्पम्॥

मेघं कृपाकरुणपारमिताभ्रकूटं सत्त्वार्थगर्जित विपश्यनविद्युमाली।
बोध्यङ्गधारसुखशीतलवृष्टिजालैः शीतीकरोमि च जगच्चिरकालतप्तम्॥

एतत्स्मरन्नहमिह क्षितिशोपविष्टो नास्तीह मे प्रणिधि संस्कृतसर्वकामैः।
बोध्यर्थिको हि विचरामिह सत्त्वहेतोः एकांशिको न हि भवाभिरतौ ममेच्छा॥

ज्ञानन्वसेत्क इह पार्थिव शत्रुमध्ये को बुद्धिमान्सभयमार्गपथं व्रजेत्।
को वा सचक्षुरिह तात पतेत्प्रपाते को बोधिमार्गमधिगम्य भवेत्प्रमत्तः॥

अनुस्रोत सर्वजगती प्रतिस्रोता सोऽहं वाचा न शक्यमिह पार्थिव बोधि प्राप्तुम्।
मेरुप्रपातमपि सागरमुत्सहेयं न त्वेव मे मन इहाभिरमेत कामैः॥

गच्छाशु पार्थिव वरस्वजनेन सार्धं सर्वा हि राष्ट्ररतिमुत्सृज सर्वलोके।
आदाय गच्छतु यथाभिमतं हि यस्य गृह्या प्रमाद मम तात न राज्यकोश्या॥

शक्या न नारिगणमध्यगतेन बोधिः प्राप्तुं शिवं पदमनुत्तरयोगक्षेमम्।
गच्छाम्यहं गिरिवनान्तरमाश्रयामि प्राप्ता ह्यरण्यनिरतेन जिनेन बोधिः॥

अथ खलु राष्ट्रपाल पुण्यरश्मी राजकुमारः प्रासादत[15b]लगत एव ताभिः प्रमदाभिः सार्धं च क्रमत्नुद्विग्नमनाः संस्त्रिभिरीर्यापथैर्विहरति। कतमैस्त्रिभिः। स्थानेन चङ्क्रमेण निषद्यया स्त्यानमिद्धपरिवर्जितः। उपरिप्रासादतलगतो ऽष्टम्यां भूमौ स्थितः सो ऽर्धरात्रकालसमये अश्रोषीत्। अन्तरीक्षाच्छुद्धावासकायिका देवता बुद्धस्य वर्णं भाषमाणा गच्छन्ति वि-

स्तरेण धर्मस्य संघस्य वर्णां भाषमाणा गच्छन्ति। श्रुत्वा च राष्ट्रपाल पुण्यरश्मी राजकुमारः संहृष्टरोमकूपजातः। अश्रु निपातयति। ससंवेगजातो ऽञ्जलिं कृत्वा तां देवतां गाथाभिरध्यभाषत॥

मयि करुणा जनित्वा देवता दुःखिते ऽस्मिन् यदि न कुरुत मन्युं किंचिदेवभिपृच्छे।
कस्य गुणा वदन्तो गच्छेतात्रान्तरीक्षे सुखितमिह मनो मे वाक्यमेतं निशाम्य॥

अथ खलु राष्ट्रपाल ता देवता पुण्यरश्मिराजकुमारं गाथाभिरध्यभाषत॥

श्रवणमुपगतस्ते किं न बुद्धः कुमार शरणमशरणानां नाम सिद्धार्थबुद्धिः।
परचरि कुशलोऽसौ पुण्यप्रज्ञागुणाढ्यो दशनियुतसहस्राध्यायिनां तस्य संघः॥

पुण्यरश्मिराह।

[1] अहमपि जिन द्रक्ष्ये कीदृशं तस्य रूपं वदत अपि च सर्वे कीदृशो चास्य वर्णः।
अहमपि परिपृच्छे कीदृशी बोधिचर्या भवति यथ चरन्वै सर्वसत्त्वैकनाथः॥

अथ खलु ता देवता पुण्यरश्मिं राजकुमारं गाथाभिरध्यभाषत॥

स्निग्धरुचिरकेशा दक्षिणावर्त्त जाता गिरितटमिव[2] हैम शोभते चास्य चोष्णिषा।
गगन इव च शून्यो[3] भासते चास्य ऊर्णा स्फटिकमणिविशुद्धा दक्षिणा नाभि जाता॥

भ्रमरगणविशुद्धा नेत्र नीलोत्पलाभा सिंहहनु नरेन्द्रो बिम्बओष्ठः स्वयंभूः।
सृजति च सहस्रं वै रश्मिकोटीरनन्तान् स्फुरति च त्रिसहस्रान्दुर्गतीः शोषयश्च॥

समसहितसुवृत्ता दन्त चित्रसुशुक्ला हिमरजतविशुद्धा विंशति द्वे गुणास्य।
जिनवरप्रवरस्य तस्य दंष्ट्राश्चतस्रः स्वकमुखप्रतिच्छादा तस्य जिह्वा प्रभूता॥

1) Mètre: Mālinī.

2) MS. इह. Id. au pāda suivant.

3) MS. शुन्यो.

गिरिवरसहितार्था तस्य प्रह्लादनीया सहित अकुटिला च ब्रह्मघोषा सुयुक्ता।
तूर्यशतसहस्रैर्वाग्जिनस्यार्हतुल्या विमतिशमकरी सा तोषणी अर्थिकानाम्॥

अविकलगुणचित्रा बोधिअङ्गानुकूला हारशतसहस्रा गुह्मिता[1] धर्ममाला।
तूर्यरतिविघुष्टा देवतागीतरम्या अमररुचिस्वरा वै ह्लादनी वाग्जिनस्य।

किंनरकलविङ्काकोकिलाचक्रवाकाबर्हिणकलहंसाघोष कोनालकानां।
ब्रह्म[16 a]रुतनिर्घोषा किंनराणां स्वराङ्गा अखलितमनवद्या सर्वअर्थानुबोधा॥

चित्रस्फटिकश्लक्ष्णा पण्डितानां मनापा चोदनी विनयनीया बोधनी प्रेमणीया।
परचरिमनुकूला तोषणी पृच्छमाना इमगुण वचना चैतस्य धर्मेश्वरस्य॥

कम्बुरुचिर ग्रीवा शान्तसंवृत्त स्कन्धः दीर्घपरिघ बाहू तस्य सप्तोत्सदाङ्ग।
कर रुचिरसुवृत्ता दीर्घवृत्ताङ्गुलीकाम् तपितकनकवर्णा तस्य गात्रं जिनस्य॥

रोम परिणताश्च दक्षिणो चैकजाता नाभि निखिल दुर्गा गुह्यकोशो हयो वा।
ऊरु गजकरो वा एणजङ्घः स्वयंभूः करतल सुविचित्रा स्वस्तिकाश्चक्रचित्राः॥

गजपतिगतिगामी सिंहविक्रान्तगामी वृषभललितगामी इन्द्रयष्टिप्रवृद्धः।
गगनकुसुमवृष्टिः पुष्पछत्रा भवन्ति व्रजतिमनुव्रजन्ति धर्म एते ऽद्भुतस्य॥

लाभ अथ अलाभे सौख्य दुःख्ये जिनस्य अयशसि यश एवं निन्द शंसासु चैवं।
जलरुहमिव तोयैः सर्वतो नोपलिप्तः एवमिह नृसिंहो नास्ति सत्त्वः समो ऽस्य॥

अथ खलु राष्ट्रपाल पुण्यरश्मी राजकुमारः बुद्धस्य वर्णां श्रुत्वा विस्तरेण धर्मस्य संघस्य वर्णां श्रुत्वा तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातो ऽभूत्। अथ खलु राष्ट्रपाल पुण्यरश्मे राजकुमारस्यैतदभवत्। यादृशः संबुद्धो भगवान् यादृशी चास्य संघसंपत्

1) *guhmita* parait être une prâcritisation de *gumphita*.

